


अथश्रीमद्भागवतचूर्णिकाचतुर्थस्कंधःप्रारभ्यते·

श्रीगणेशायनमः श्रीमत्कुलदेवतायैनमः मैत्रेयउवाच मनोस्तु शतरूपायां आकूतिः देवहूतिः प्रसूतिः इतितिस्रः
कन्याःजज्ञिरे मनुः रुचये पुत्रिकाधर्मेण आकूतिं प्रादात् तस्यांरुचिःमिथुनंअजीजनत् तत्रयः पुरुषः सः यज्ञ इतिसंज्ञयाविष्णव-
वतारः यास्त्रीसादक्षिणानाम्नी लक्ष्म्यंशा मनुः तंगृहे आनयत् यज्ञः दक्षिणांउवाह तस्यां तोषः प्रतोषः संतोषः भद्रः इडस्पतिः
शांतः इध्मः कविः विभुः स्वन्हः सुदेवः रोचनः एवंद्वादशदेवाः अभवन् तेस्वायंभुवेंतरे हविर्भुजः देवाः आसन् तत्रमरीच्यादयः
ऋषयः यज्ञःअवतारः सएवइंद्रः प्रियव्रतोत्तानपादौ मनुपुत्रौ तथाकर्दमायदेवहूतिं अदात् तच्चरितंउक्तम् तथाब्रह्मपुत्रायद
क्षायप्रसूतिंददौ यत्सर्गः त्रिलोकींविततः परं कर्दम कन्यानां वंशंशृणु मरीचेः पत्नी कलाकश्यपंपूर्णिमानंच सुषुवे कश्यपवंशं
षष्ठे वक्ष्ये पूर्णिमाविरजंविश्वगं देवकुल्यांच कन्यांअसूत याजन्मांतरे गंगाभूत् अत्रेःपत्नी अनसूयात्रीन् दत्तदुर्वासःसोमान् वि
ष्णवीशब्रह्मसंभवान् सुतान्जज्ञे विदुरउवाच अत्रेर्गृहे ईशाः किंस्विच्चिकीर्षवोजाताः तद्वद मैत्रेयउवाच
ब्रह्मणा सृष्टौ नोदितः अत्रिः पत्न्यासह ऋक्षंअद्रिं एत्य तत्रएकेनपदातिष्ठन् वर्षशतंतपसिस्थितः इदंआह यः ईश्वरोस्तिसः मे
स्वतुल्यांप्रजांयच्छतु इतितंशरणंप्राप एतत् ज्ञात्वा तेदेवाः अत्रेःआश्रमंययुः तान् दृष्ट्वाप्रणम्य पूजयामास अस्तौत्च अत्रि
रुवाच हेदेवाः वःप्रणतोस्मि मयाएकएव आहूतः सःकः इति भवद्भिरेव कथनीयः देवाऊचुः हेअत्रेयदेकंतत्त्वंत्वंध्यायसि
तेएववयम् ३ प्राप्ताः अस्मद्दर्शनंअन्यथान अतः अस्मदंशभूतास्तेपुत्राः भविष्यंति एवंवरंदत्वाजग्मुः ततः ब्रह्मणोंशेन सोमः
विष्णवंशेनदत्तः शिवांशेन दुर्वासाः बभूवुः अंगिरसः पत्नीश्रद्धानाम्नीसिनीवाली कुहूराकानुमतीः असूत उतथ्य बृहस्पती १
पुत्रौ पुलस्त्यः हविर्भुवि अगस्त्यंविश्रवसंच अजनयत् विश्रवाः इडविडायां कुबेरं केशिन्यां रावणं कुंभकर्णं बिभीषणंच अ-

जनयत् पुलहः गत्यां कर्मश्रेष्ठं वरीयांसं सहिष्णुंच असूत क्रतुः क्रियायां ६०००० वालखिल्यान् असूत वसिष्ठः ऊर्जायां चि-
त्रकेतुम् सुरोचिम् विरजसम् मित्रम् उल्बणम् वसुभृद्यानम् द्युमंतम् एतान् प्रासूत अथर्वणः चित्यां धृतव्रतम् दध्यंचं प्रासू-
त भृगुः ख्यात्यां धातृ विधाता रौ श्रियंच प्रासूत ताभ्यां मेरुः आयतिं नियतिंच द्वेकन्ये ददौ तयोः ताभ्यां मृकंडः प्राणश्च द्वौ जा-
तौ मृकंडात् मार्कंडेयः प्राणात् वेदशिराः भृगोः अन्यपुत्रः कविः कवेः उशनाः एषा कर्दमकन्यासंततिः कथिता दक्षः प्रसूत्यां षो-
डश कन्याः अजनयत् तासु त्रयोदश धर्माय अग्नये एका पितृभ्यः एका भवाय एका श्रद्धा धर्मस्त्री शुभं पुत्रं असूत मैत्री २ प्रसा
दं दया ३ अभयं शांतिः ४ सुखं तुष्टिः ५ मुदं पुष्टिः ६ स्मयं क्रिया ७ योगं उन्नतिः ८ दर्पं बुद्धिः ९ अर्थं मेधा १० स्मृतिं तितिक्षा
११ क्षेमं न्हीः १२ प्रश्रयं मूर्तिः नरनारायणौ ऋषी प्रासूत तयोर्जन्मनि इदं विश्वं आनंदं प्राप तदा वाद्यानि अवादंत पुष्पवृष्टि-
यः पेतुः मुनयः तुष्टुवुः गंधर्वादयो जगुः देव्यः ननृतुः ब्रह्मादयः स्तुतिंचक्रुः हे ईश्वरा ते पुरुषायनमः एवं स्तुतौ तौ गंधमादनं यय-
तुः तौ हरेः अंशौ इह भुवः भारव्ययाय कृष्णार्जुनौ जातौ अग्निः स्वाहायां पवमानं पावकं शुचिं असूत तेभ्यः अग्नयः ४५ एताः
एवं सर्वे ४९ अभवन् पितरः स्वधायां वयुनां धारिणींच द्वे कन्ये प्रासूत भवस्य पत्नी सती तु दक्षकोपात् अप्रौढ एव योगेन देहं
जहौ ६९ इति चतुर्थे प्रथमः १ विदुर उवाच दक्षः चराचरगुरुं शिवं प्रति कुतः द्वेषं अकरोत् हे मैत्रेय जामातुः श्वशु-
रस्य द्वेषे किं कारणम् यतः सती प्राणान् जहौ एतत् सर्वं वद मैत्रेय उवाच पुरा विश्वसृजां सत्रे ऋषयः देवाः अग्नयः
प्राप्ताः तत्सभायां तेजसा सूर्यमिव दक्षं प्रविष्टं दृष्ट्वा विरिंच्यं शिवं विना सर्वे उत्थिताः सर्वैः सत्कृतः दक्षः अजं नत्वा निषसाद
अनुत्थितं मृडं दृष्ट्वा चक्षुर्भ्यां दहन्निव वक्रं वीक्ष्य उवाच हे सभासदः श्रूयताम् २ अयं तु लोकपालानां यशोघ्नः निर्लज्जः

येन सत्पंथाः त्यक्तः एषः मे शिष्यतां प्राप्तः विप्राग्निसमक्षं मे पुत्र्याः पाणिं मर्कटलोचनो यं जग्राह प्रत्युत्थानाभिवादार्हे
मयि न सत्कृतं अशुचये अस्मै शूद्राय वेदमिव बालां अदाम् अयं स्मशाने तिष्ठति चिताभस्मकृतस्नानः प्रेतस्रङ्नृस्थि
भूषणः एवंभूताय उन्मादनाथाय ब्रह्मणा नोदितेन मया साध्वी दत्ता मैत्रेयउवाच एवं दक्षः विनिंद्य शिवं शशा
प अयं यज्ञे देवैः सह भागं न लभताम् दक्षः सर्वैः निषिध्यमानोपि शिवाय शापं दत्वा स्वगृहं ययौ तदा नंदीश्वरः दक्षाय ये
च तन्निंदां अन्वमोदंत तेभ्यः शापान् ददौ यः भगवति द्रुह्यति सः परमार्थतः विमुखो भवेत् अयं दक्षः गृहेषु सक्तः नित्यं क
र्म करोति अतः स्त्रीकामः अस्तु यः आत्मगतिं न वेद तस्मात् अयं पशुरूपः बस्तमुखः भवतु अयं अविद्यायां विद्याबुद्धिः अ
स्तु ये च दक्षं अनुसरंति ते सर्वे जन्ममरणादि यातनां अनुभवंतु ये एनं अनुसृताः ब्राह्मणाः ते विद्यातपोव्रतयुक्ता अपि
सर्वभक्षाः संतः इह याचकाः विचरंतु एवं श्रुत्वा भृगुः तं अशपत् ये शिवव्रतधराः ते पाखंडिनः भवंतु किंच जटाभस्मास्थि
धारिणः नष्टशौचाः शिवदीक्षां विशंतु मैत्रेयउवाच ततो भवः भृगुवाक्यं श्रुत्वा खिन्न इव सानुगः निष्क्राम ते
विश्वसृजः सहस्रपरिवत्सरान् सत्रं कृत्वा प्रयागे अवभृथं आप्लुत्य सर्वे स्वं स्वं धाम ययुः ३५ इति श्री भाग॰ चतु-
र्थे द्वितीयः २ मैत्रेयउवाच सदा जामातुः श्वशुरस्यापि द्विषतोः सतोः महान् कालः अगमत् यदा ब्रह्मणा प्रजा
पतीनां आधिपत्ये दक्षः अभिषिक्तः तदा तस्य अतिगर्वः अभवत् सः एकदा वाजपेयेन इष्ट्वा सेश्वरान् तिरस्कृत्य बृहस्पतिस
वं नाम क्रतुं आरेभे तस्मिन् क्रतौ सर्वे देवर्षिपितरः सपत्नीकाः आययुः नभसि खेचराणां प्रजल्पतां वचांसि श्रुत्वा वि- २
मानैः देवस्त्रियः स्वलंकृताः व्रजंतीः दृष्ट्वा औत्सुक्यात् सती शिवं अभाषत सत्युवाच हे शिव सांप्रतं ते श्वशु

रस्य गृहे यज्ञ महोत्सवः आरब्धः किल तत्र विबुधाः व्रजंति वयंच तत्र गच्छामः मम भगिन्यः सभर्तृकाः तत्र गमिष्यंति पश्य
पश्य अहंच भवता सह तत्र गत्वा अलंकारादिकं कामये तत्र बहुकालतः मातृभगिन्यादीः द्रक्ष्ये हे भगवन् त्वयि नैतदाश्चर्य-
म् तथापि अहं योषित् तव स्वरूपं नवेद्मि अतः जन्मभूमिं द्रष्टुं इच्छामि नभोमंडलं विमानैः व्याप्तं पश्य पितृगेहे कौतु
कं श्रुत्वा गंतुं इच्छा कथं न स्यात् भर्तुः गुरोः पितुश्च गृहं अनाहूता अपि यांति तस्मात्त्वया सह गंतुं मे प्रसीद श्रीशुकउ
वाच गिरित्रः एवं सतीवाक्यं श्रुत्वा विश्वसृजां समक्षतः दक्षः यत् आह तत्स्मरन् उवाच हे शोभने बंधुषु अनाहूता अ
पि गच्छंतीति यत्त्वयोक्तं तच्छोभनमेव तथापि तेऽहंकारेण मदेन मन्युना च दोषदृष्टयः न भवंति चेत् तर्हि गंतव्यम् किंच वि
द्यातपोवित्तवपुर्वयः कुलैर्ये गर्विष्ठाः ते श्रेष्ठानां तेजः न पश्यंति एवंभूतानां स्वजनसंगेच्छा नये अभ्यागतान् वक्रधिया पश्यं
ति तद्गृहान्न गंतव्यं यथा वक्रधियां स्वानां दुर्भाषणैः मर्मताडितः दिवानिशं तप्यति तथा अरिमुक्तैः बाणैः नव्यथते त्वं दक्षक-
न्यानां मध्ये अति मान्यासि अथापि पितुः मानं न लप्स्यसे यतः ममाश्रया दृक्षः त्वयि परितप्यते दक्षः सर्वत्र हरिव्याप्तिं न-
जानाति तस्मात्त्वया पितापि न निरीक्ष्यः यः पूर्वं यज्ञगतं मां निरपराधं दुर्वचोभिः तिरस्कृतवान् हे देवि मद्वचः अतिक्रम्य य
दि गच्छसि तर्हि तव भद्रं न संभावितस्य चाकीर्तिर्मरणाय प्रकल्पते इति २५ इति चतुर्थे तृतीयः ३ मैत्रेय उवाच शं
करः उभयत्र पत्न्यं गनाशं ज्ञात्वा इत्युक्त्वा च विरराम सा सुहृद्दिदृक्षुः निष्क्रामती निर्विशती आंदोलवत् द्विधा आस सा भवं रुषा ध-
क्ष्यतीव ऐक्षत ततः सती विनिश्वस्य तं विहाय पित्रोः गृहं अगात् शिवानुचराः तदा एकां गच्छंतीं सतीं वृषेंद्रसहिताः सपार्षदयक्षाः म
णिमन्मदादयः तत्क्रीडासाधन सारिकाकंदुकादीन् प्रगृह्य श्वेतातपत्रादिभिः तां वृषेंद्रं आरोप्य शोभिताः संतः देवर्षिजुष्टं वेदघोष

नादितंयज्ञस्थानंसमाविशन् तत्रतांदक्षभयात् कश्चननाद्रियत् सामात्रादिभिः दत्तांपूजांनगृह्णात् तंयज्ञंअरुद्रभागंअवेक्ष्यलो
कान्धक्ष्यतीवरुत्कोपतदा दक्षवधायउत्थितान्स्वगणान् निगृह्य सर्वेषांशृण्वतांसाउवाच अहो यस्यलोकेप्रियः अप्रियश्चनत
स्मिन्शिवेत्वांविनाकः प्रतिकूलंआचरेत् यस्य द्व्यक्षरंशिवेतिनामनृणांगिरेरितं सकृत् प्रसंगाद्यातत् आशुअघंहंति तंपवित्र-
कीर्तिंशिवंशिवेतरः त्वंद्वेष्टि शिवरूपंत्वंनवेत्सि किंच श्मशानेजटाः अवकीर्यक्रीडतः उद्धृतं माल्य भस्मादि अन्येब्रह्मादयः मू
र्द्धभिः दधति तस्मिन्त्वं द्रुह्यसि यत्रसभायांमहतांनिंदा भवति ततः कर्णौपिधायनिर्गच्छेत् शक्तश्चेत्तज्जिह्वांछित्वास्वयम
पिप्राणान्त्यजेत् इतिधर्मः अतःशिवनिंदकात् त्वत्तः उत्पन्नंइमंदेहंनधारयिष्ये भक्षितान्नस्य शुद्धिः वमनंविनान अतःशिवेकृ
तागसः तवदेहात् उत्पन्नंइदंशवरूपंवपुः त्यक्ष्यामि मैत्रेयउवाच सतीइत्युक्त्वाउदङ्मुखीसतीआसनंस्थित्वा योगमार्गं
प्राविशत् आदौप्राणापानौनाभिचक्रेसमौकृत्वा ततः उदानंउत्थाप्य ततः हृदयादिषुआनीय भ्रूमध्यंअनयत् ततः भर्तुश्चरणां
बुजंध्यायतीसद्यः समाधिजाग्निनादेहंअदहत् तदाखेभुविचहाहाकारः अभूत् सर्वेऊचतुश्च केनसतीप्रकोपिता अयंब्रह्मध्न-
कृ महदपकीर्तिंप्राप्स्यति तद्दृष्ट्वाशिवानुचराः दक्षंहंतुंउदतिष्ठन् भृगुः तेषांवेगंदृष्ट्वा यज्ञघ्नघ्नेन मंत्रेणदक्षिणाग्नौजुहाव तदा-
ऋभवोनामदेवाः सहस्रशः उत्पन्नाः तैः अलातायुधैः हन्यमानाः शिवानुचराः दिशः भेजुः ३४ इतिचतुर्थेचतुर्थोऽध्यायः ४
मैत्रेयउवाच भवः दक्षेण असत्कृतायाः भवान्याः निधनंनारदात्श्रुत्वा स्वसैन्यंपलायितंच श्रुत्वाक्रुद्धः धूर्जटिः जटांउत्कृत्य
भुविससर्ज ततः जटायाः सकाशात् वीरभद्रः तन्वादिवंस्पृशन् सहस्रबाहुः त्रिसूर्यदृक् अनेकायुधधरः उत्पन्नः किंकरोमीतिगृ ३
णंतंतंशिवः आहहेवीरभद्र त्वंमेअंशोसि अतः सयज्ञंदक्षंजहि तदावीरभद्रः पार्षदैः सहशूलंउद्यम्य यज्ञं अगमत् तदाऋत्विगाद्याः

उत्तरस्यांदिशिरेणुंवीक्ष्यकिमेतदितिचिंतयामासुः अधुनालोकः किंप्रलयायकल्पते तदादक्षपत्न्याद्याः स्त्रियःसत्याः अपमानस्येदं
फलमिति ऊचुः यःविश्वलयंकरोति तस्यकोपात् स्वस्तिस्यात् किम् तदासहस्रशः उत्पाताः उत्पेतुः तावत् अनेकरूपैः यज्ञः अन्व
रुध्यत केचित्प्राग्वंशंबभंजुः अपरेपत्नीशालांअन्ये आग्नीध्रशालां तथा यजमानगृहं यज्ञपात्राणिकेचित् अग्नीन् अनाश
यन् कुंडेषु अमूत्रयन् अन्येमुनीन् अबाधंत एकेपत्नीः अतर्जयन् अपरे पलायितान् देवान् जगृहुः मणिमान् भृगुंबबंध
वीरभद्रः दक्षम् चंडीशः पूषणम् नंदीभगम् सर्वेऋत्विक् सदस्यदेवाः पाषाणैः अर्द्यमानाः दुद्रुवुः वीरभद्रः स्रुवहतः भृगोः
श्मश्रूणि उत्पाटितवान् भगंभुविपातयित्वा तस्यनेत्रेउद्धृतवान् पूष्णः दंतान् अपातयत् दक्षशिरः हेतिनाछिंदन् अपिउद्ध
र्तुंनाशकत् तदाचिरंध्यात्वापशुवत् कंठपीडनादिनादक्षशिरः आहरत् तदाशिवगणानांसाधुवादः अभूत् ब्राह्मणादयः
शोकंचक्रुः वीरभद्रः दक्षिणाग्नौतच्छिरः हुत्वादेवयजनंदग्ध्वा कैलासंययौ २६ इतिचतुर्थेपंचमः ५ मैत्रेयउवाच
अथसर्वेदेवगणाः रुद्रसैन्यैः पराजिताः छिन्नभिन्नसर्वांगाः भयाकुलाः ब्रह्मणेनमस्कृत्य इदंन्यवेदयन् पूर्वंइदंभाविज्ञा
त्वा ब्रह्मनारायणौदक्षयज्ञंनजग्मतुः ब्रह्मातच्छ्रुत्वाप्राह तेजीयसि अपराधः क्षेमायनस्यात् यूयंसापराधाः यतः तद्भागंलु
प्तवंतः अतः तत्पादौप्रगृह्यप्रसादयध्वम् अहंइंद्राद्याश्च तद्वीर्यबलप्रमाणंनविद्मः इत्युक्त्वादेवर्षिपितृप्रजेशैः सहब्रह्माकै
लासंययौ कीदृशंकैलासं योगसिद्धैःजुष्टम् गंधर्वादिभिःवृतम् अनेकमणिमयशृंगैःयुतम् अनेकद्रुमलताभिःव्याप्तम् नानामृ
गपक्षिभिः वृतं अनेकदिव्यकौतुकैः युक्तंकैलासंवीक्ष्यदेवाद्याः विस्मयंप्रापुः तत्रअलकांपुरींसौगंधिकंवनंचपुरः बाह्यतः नं
दालकनंदेतिद्वेसरितौददृशुः तांकुबेरपुरींहित्वा ततः आरात् वटंददृशुः सःयोजनशतंउच्छ्रायः पंचसप्ततियोजनमितशाखा

वाम विद्याधराऊचुः त्वन्मायया अस्मिन् देहे ममाहमिति दुर्मतिः पुत्रादिभिः क्षिप्तोपि आत्ममोहं न त्यजति त्वत्कथामृ
तसेवकस्तु त्यजति ब्राह्मणाऊचुः यज्ञः हविः अग्निः मंत्रः समित् दर्भाः पात्राणि सदस्यादयश्च त्वमेवासि त्वं वराहः सन्
पृथिवीं रसायाः उद्धृतवान् त्वं अस्माकं प्रसीद तेनमोस्तु किंच सः स्वधर्मेण प्रजापालनादितत्परः सन् निरभिमान एवावनिं
पालयामास तस्य कथां पांडवेयादयः गायंति कः नृपः कर्मभिः गयं भगवत्कलामृते अनुकरोति किंच दक्षकन्याः यं अभ्य
षिंचन् यस्य प्रजाशिषः धरा दुदुहे यद्बाणैः पूजिताः नृपाः यस्य बलिं ददुः यस्य यज्ञे भगवान् यज्ञफलं प्रत्यक्षतः स्वीकृतवान्
मैत्रेयउवाच एवं कीर्त्यमाने हरौ दक्षः यज्ञं प्रवर्तयामास भगवान् सर्वात्मा सर्वभागभुक् दक्षं बभाषे श्रीभग
वानुवाच अहं ब्रह्मा च शर्वश्च जगतः कारणं परम् आत्मेश्वरः अहं मायां आश्रित्य विश्वं सृजन् रक्षन् हरन् क्रियोचितां सं
ज्ञां दध्रे एवंभूते मयि ब्रह्मरुद्रौ भूतानि च भेदेन यः पश्यति सः अज्ञः सर्वत्र ऐक्येन यः पश्यति सः शांतिं प्राप्नोति मैत्रेयउ
वाच दक्षः इति यज्ञं समाप्य अवभृथं सस्नौ देवाद्याः धर्मे तस्य मतिं स्थाप्य दिवं ययुः एवं दक्षकन्या सती पूर्वदेहं हित्वा हि
मवतः मेनायां जज्ञे इति शुश्रुम अंबिका भूयः तमेव पतिं भजते स्म एतत् दक्षाध्वरद्रुहः शंभोः कर्म बृहस्पतेः शिष्यात् उद्धवा
त् मया श्रुतम् हे विदुर इदं पवित्रं ईशचेष्टितं यशस्यं आयुष्यं यः शृणुयात् कीर्तयेद्वा सः अघं धुनोति ६१ इतिचतुर्थे सप्तमः
मैत्रेयउवाच सनकाद्याः नारदश्च ऋभुर्हंसोरुणिर्यतिः एते नैष्ठिकाः अतः गृहाश्रमं न चक्रुः ब्रह्मणः पृष्ठात् जातस्य अ
धर्मस्य वंशमाह अधर्मः मृषायां दंभं मायां च प्रासूत तन्मिथुनं अप्रजः निर्ऋतिः जगृहे तयोः लोभः शठता ताभ्यां क्रोधः हिंसा ता
भ्यां कलिः दुरुक्तिश्च ताभ्यां भयं मृत्युश्च ताभ्यां यातना निरयश्च इमं अधर्मवंशं श्रुत्वा एतेषां त्यागद्वारा मलं हित्वा पुण्यं आप्नोति अ

थस्वायुभुवमनोः पुण्यवंशकीर्तये मनोः प्रियव्रतोत्तान पादौद्वौपुत्रौ तत्रउत्तानपादस्यसुनीतिः सुरुचिःस्त्रियौ सुरुचिः पत्युःप्रे-
यसी यत्सुतोध्रुवःसानप्रियाआस एकदाराजासुरुचेः पुत्रंउत्तमंनामलालयन् ध्रुवंअंकंआरोढुंइच्छंतंनाभ्यनंदत् तदासुरु-
चिः तथाचिकीर्षमाणंध्रुवंदृष्ट्वाराज्ञःशृण्वतः गर्विता सती सेर्ष्यं आह हेवत्सत्वंनृपतेः आसनं आरोढुंनार्हसि यतः त्वंमयाकु-
क्षौनधृतः तवएवंमनोरथश्चेत् तर्हितपसाहरिंआराध्यतत्कृपयामेगर्भेआत्मानंसाधय मैत्रेयउवाच एवंसापत्नमातुः
दुरुक्तिबाणैः विद्धः अहिरिवश्वसन् पश्यंतंमौनीभूतंपितरंहित्वारुदन्मातुः सकाशंजगाम सुनीतिः सपत्न्याः वाक्यंश्रुत्वाबालं
अंकेआरोप्यशुशोच आहच हेबालराजामांभार्याइतिवक्तुंलज्जते सुरुच्याभिहितंसत्यं यदि आसनंइच्छसितर्हिअधोक्षजं-
आराधय हरेः अन्यंदुःखच्छिदंनजानामि मैत्रेयउवाच एवंमातुर्वचः श्रुत्वापुरात् निर्जगाम नारदः ध्रुवचिकीर्षितंज्ञात्वा
एत्य पाणिनामूर्द्धनिस्पृष्ट्वा आह हेपुत्रक अस्मिन् वयसितेमानापमानौनस्तः मात्रोपदिष्टंकर्तुंइच्छसि तर्हिसः दुराराध्यः
अतः निवर्त्यताम् यस्ययथादैवं तथा आत्मानंतोषयन् क्षेमंप्राप्नोति अतः दुरुक्तंमनसिमाकुरु ध्रुवउवाच हेनारद
भवदुक्तंसुरुच्याः दुर्वचोबाणैः भिन्नेहृदिनतिष्ठति त्रिभुवनोत्कृष्टंअन्यैः अनधिष्ठितंपदंइच्छोः ममउपायंब्रूहि ना
रदउवाच तेजनन्यायदुक्तंसएवपंथाः तस्मात् वासुदेवंभज सः मोक्षमपियच्छति हेतात यमुनायास्तटे मधुवनेगत्वा
तत्र यमुनाजलेस्नात्वा आसनंप्रकल्प्य प्राणायामेन मनोमलंहित्वा किरीटिनंकुंडलिनंचतुर्भुजंमनसिस्थितंस्मयमानंहरिंम
नसाध्यायेत् किंच ॐ नमोभगवतेवासुदेवायेतिमंत्रंजपेत् यः प्रपठन् पुमान् सप्तरात्रात् खेचरान् पश्यति तेनमंत्रेणव
न्यैर्माल्यफलादिभिः हरेः पूजांकुर्यात् एवंकायमनोवचोभिः पूजितोभगवान् पुंसां अभीष्टंश्रेयोदिशति इत्युक्तः सन् ध्रुवः

तंप्रणम्य मधुवनं ययौ नारदः उत्तानपादं एत्य पुत्रशोकातुरं राजानं उवाच हेराजन् किंचिंतयसि राजोवाच हेब्रह्म
न् मया पंचवर्षः स्रुतः मात्रा सह निर्वासितः तं वने श्रांतं क्षुधितं शयानं वृकादयः किंनखादंति अहोस्त्रीजितस्य मेदौरात्म्यं
पश्यपश्य प्रेम्णा अंकं आरुरुक्षंतं नाभ्यनंदम् नारदउवाच हेराजन् माशुचः तवपुत्रः देवैरपि कर्तुमशक्यं कर्म कृत्वा
अचिरं एष्यति मैत्रेयउवाच इतिदेवर्षिणोक्तं श्रुत्वा पुत्रमेव अनुचिंतयत् ततः ध्रुवः मधुवनं गत्वा नारदोक्त मंत्रेण ह
रिं अर्चयन् त्रिरात्रांते त्रिरात्रांते कपित्थबदराशनः एवं एकमासं निन्ये द्वितीयं षष्ठे २ दिने तृणपर्णादिभिः तृतीयं नवमे २ अ
हनि अप् भक्षः चतुर्थं द्वादशे २ अह्नि वायुभक्षः पंचमे एकपादेन स्थितः ब्रह्म धारयामास तदा पृथ्वी ननाम तस्य श्वासनिरोधे
न विश्वस्य प्राणनिरोधो जातः तदा सर्वे देवाद्याः भीताः संतः हरिं शरणं ययुः श्रीभगवानुवाच हेदेवाः माभैष्ट यस्मा
त् वः प्राणनिरोधो जातः तं बालं तपसः निवर्तयिष्ये यूयं स्वस्थानं यात ८२ इतिचतुर्थे अष्टमः ८ मैत्रेयउवाच
देवाः भगवद्वाक्यात् निर्भयाः भूत्वा स्वर्गं ययुः हरिरपि गरुडारूढः सन् मधुवनं ययौ ध्रुवः हृत्स्थं हरिं तिरोहितं आलक्ष्य बहिः
स्थितं दृष्ट्वा दंडवत् ननाम हरिः ध्रुवकपोले शंखेन पस्पर्श ध्रुवः स्पर्शमात्रेण उत्पन्नज्ञानः तं अस्तौत् ध्रुवउवाच यः
त्वं अंतः प्रविश्य मम सुप्तां वाचं अन्यांश्च इंद्रियादीन् संजीवयसि तस्मै तुभ्यं नमः हे हरे तव भक्तिं कुर्वतां सतां प्रसंगः भूया-
त् येन भवाब्धिं तरिष्ये इत्यादि मैत्रेयउवाच एवं स्वस्तवं श्रुत्वा भगवानुवाच हे ध्रुव तवेच्छां अहं वेद्मि तत् प्रयच्छामि
यत्र ग्रहर्क्षताराणां चक्रम् मेढ्यां गोसमूहवत् बद्धम् यत्र च धर्माग्निकश्यपादयः प्रदक्षिणं चरंति तत् ध्रुवपदं ते अक्त तुभ्यं पृथ्वीं दत्वा त ६
व पितरि वनं गते सति षट्त्रिंशत् वर्षसाहस्रं राज्यं करिष्यसि त्वद्भ्रातरि उत्तमे मृगयायां नष्टे सति तन्मातातं अन्वेषंती दावाग्निं प्रवेक्ष्यति त्वं

यज्ञैः इष्ट्वा अंते मां स्मृत्वा ऋषिभ्यः उपरिष्टात् अचलं मत्स्थानं गमिष्यसि मैत्रेय उवाच इत्युक्त्वा भगवान् स्वधाम अगा
त् ध्रुवोपि मनोरथं प्राप्य नातिप्रीतमनाः सन् पुरं अगात् विदुर उवाच हे मुने ध्रुवः हरेः पदं लब्ध्वाऽपि आत्मानं अप्राप्तम-
नोरथमिव कथं अमन्यत मैत्रेय उवाच सापत्नमातुर्वाग्बाणैः विद्धः ध्रुवः तान् स्मरन् सन् मुक्तिं नैच्छत् तस्मात् तापं प्रा
प्तः ध्रुव उवाच अहो मंदभाग्यस्य मे अज्ञत्वं पश्यत भवच्छिदः पादमूलं गत्वा अंतवत् यत् तत् याचे नारदवचः न गृ
हीतो मे मतिः देवैः दूषिता ईश्वरं प्रसाद्य मया एतत् राज्यादिव्यर्थं प्रार्थितम् अहं निर्दैवः भवच्छिदं हरिं भवं याचे अहो निजानं
दं ददतः हरेः मया मानो भिक्षितः मैत्रेय उवाच हे विदुर त्वादृशाः हरिदास्यं विना अन्यन्न वांछंति राजा पुत्रागमनं श्रु
त्वा वार्ताहर्तुः हारं ददौ तदा ब्राह्मणादिभिः सह संमुखं अगात् तथा सुरुचिः सुनीतिश्च उत्तमेन सह शिबिकां आरुह्य जग्मतुः
नगराभ्याशे ध्रुवं दृष्ट्वा रथात् अवप्लुत्य तं दोर्भ्यां उदूह्य परिरेभे सः पितुः पादौ ननाम मातरौ च सुरुचिः तं परिष्वज्य जीवेत्या
शिषं ददौ भगवान् मैत्र्यादिगुणैः यस्य प्रसन्नस्तस्मै सर्वभूतानि नमंति ततः जनाः सुनीतिं धन्यां इति शशंसुः नृपः ध्रुवं करिण्यां
आरोप्य अनेकशोभाढ्यं नगरं प्राविशत् सकलसंपद्युक्तं गृहं प्रविष्टः राजर्षिः ननंद ध्रुवं ऊढवयसं प्रजानां संमतं ज्ञात्वा भुवः
पतिं कृत्वा स्वयं वृद्धः विरक्तः सन् वनं प्रातिष्ठत् ६७ इति चतुर्थे नवमः ९ मैत्रेय उवाच ध्रुवः शिशुमारस्य प्र-
जापतेः भ्रमिं नाम कन्यां उवाह तस्सुतौ कल्पवत्सरौ आस्ताम् द्वितीयायां वायोः पुत्र्यां इलायां उत्कलं पुत्रं अजीजनत् उत्त-
मस्तु अकृतविवाहः हिमाद्रौ मृगयार्थं गतः तत्र पुण्यजनेन हतः तन्माताऽपि मृता ध्रुवः भ्रातृवधं श्रुत्वा कोपयुक्तः रथं आस्था
य उदीचीं गत्वा पुण्यजनालयं दृष्ट्वा शंखं दध्मौ तच्छब्देन यक्षस्त्रियः अत्रसन् ततः उपदेव महाभटाः तन्निनादं श्रुत्वा उ

ओ॰ ६ हस्तिनीं॰ ओ॰ २ राक्षसेन॰

दायुधाः अभिपेतुः ध्रुवः तान् त्रयोदशायुतानि यक्षान् एकैकं त्रिभिस्त्रिभिः बाणैः ललाटे अविध्यत् तेपिद्विगुणशरैः तं अवि
ध्यन् ततः अनेकशस्त्रास्त्रैः युद्धं अभूत् तेत्रयोदशायुतसंख्याकाः ध्रुवं शस्त्रवर्षणेन आच्छादयामासुः तदासिद्धादीनां हा-
हाकारो भूत् ततः नीहारात् सूर्यइव ध्रुवरथः उदतिष्ठत् तेषां अस्त्रौघं व्यर्थं कृत्वा स्वबाणैः तान् अहनत् हतयक्षैः रणभूः आ
स्तृता अभूत् हतावशिष्टाः यक्षाः प्रायः छिन्नावयवाः अदृश्याः भूत्वा आसुरीः मायाः ससृजुः तदेवाह आदौ रजः अदृश्यत मेघाः
रुधिरपूयविण्मूत्रमेदसः ववृषुः गदापरिघनिस्त्रिंशाश्मानश्च पेतुः सर्पगजव्याघ्रसिंहादयः अभ्यधावन् समुद्रः प्लावयन्निव
अदृश्यत एवं मायाः ससृजुः तदा मुनयः एतत् ज्ञात्वा तत्रागत्य ध्रुवस्य कल्याणं ऐच्छन् मुनयऊचुः हे औत्तानपादे भग
वान् शार्ङ्गधन्वा तव शत्रून् नाशयतु लोकः यन्नामधेयं उच्चार्य निशम्य वा दुस्तरमपि मृत्युं तरति ३० इतिचतुर्थे दशमः १०
मैत्रेयउवाच एवंवदतां ऋषीणां वाचं निशम्य ध्रुवः धनुषि नारायणास्त्रं संदधे अस्त्रे संधीयमाने गुह्यकनिर्मिताः मायाः
यथा ज्ञानोदये क्लेशाः तथा विनेशुः नारायणास्त्रतः बाणाः विनिःसृत्य शत्रुबलं विविशुः तैः ध्रुवः पुण्यजनान् निकृत्तबाहूरु
शिरोधरोदरान् कृत्वा परलोकं निनाय ध्रुवेण गुह्यकान् हन्यमानान् वीक्ष्य तदा मनुः ऋषिभिः सह तत्र एत्य ध्रुवं जगाद म
नुरुवाच हे वत्स पाप्मना तमोद्वारेण अतिरोषेण अलम् येन अनागसः पुण्यजनान् अवधीः एतत् सद्भिः निंदितं कर्म अ-
स्मत्कुलोचितं न अकृतापराधानां उपदेवानां वधः आरब्धः इदं अन्याय्यम् ननु एकस्य अपराधेन प्रसंगात् त्वयाबहवो ह
ताः अयं साधूनां पंथाः न भवान् दुराराध्यं हरिं आराध्य विष्णोः परमं पदं लब्ध्वा सतां व्रतं शिक्षन् कथं निंद्यं कृतवान् असि ति ७
तिक्षया करुणया मैत्र्या चाखिलजंतुषु समत्वेन च सर्वात्मा भगवान् संप्रसीदति भगवति प्रसन्ने सति पुरुषः प्राकृतैः गुणैः

ओ॰ १ । १३० सहस्राणि॰

मुक्तोब्रह्मनिर्वाणंऋच्छति परमात्मनः माययासृष्टिचक्रंप्रवर्तते तस्यकर्तव्यतांकोपि नवेद तस्मात् हेतात तमेवहरिंसर्वा
त्मनाशरणंव्रज यत्प्रसादात्लोकत्रयमूर्ध्निपदंलब्धवानसि तंपरमात्मानं अवलोकय अहंकारग्रंथिंछित्वातद्भक्तिंकुरु हेध्रु
वश्रेयसांघातकंरोषंसंयच्छ रेत्वयाशिवसखस्यकुबेरस्यहेलनंकृतम् अतःनम्रत्वेनतंप्रसादय यावत् महतांतेजः नःकु
लंन अभिभवेत् तावत् मनुः एवंपौत्रंअनुशास्यऋषिभिः सहस्वपुरंययौ ३५ इतिचतुर्थेएकादशः ११ मैत्रेयउवा०
कुबेरः ध्रुवंवधात्निवृत्तंज्ञात्वा यक्षादिभिः स्तूयमानः तत्रागत्यध्रुवंअवदत् धनदउवाच हेक्षत्रियपुत्र-
यः त्वंमन्वादेशात्वैरंत्यक्तवान् अतः तेभद्रम् भवान् यक्षान्नावधीत् नयक्षाः तवभ्रातरम् किंतु कालएवसर्वेषांमृत्युजन्म
नोः प्रभुः इतः त्वंगच्छहरिभक्तिंकुरुमत्तः कामवरंवरय मैत्रेयउवाच तदाध्रुवः अचलांस्मृतिंवव्रे कुबेरः तथेत्युक्त्वा
अंतर्दधे ध्रुवः स्वपुरंययौ भूरिदक्षिणैः क्रतुभिः हरिंअयजत् प्रजाः तंपितृवत् मेनिरे सः क्षितिमंडलंषट्त्रिंशद्वर्षसह-
स्त्रंशशास एवंअनेकयज्ञैः बहुकालंनीत्वासुखदुःखादिभोगैः पुण्यपापक्षयंकुर्वन् इदंविश्वंआत्मनिमायारचितंमन्यमा-
नः पुत्रायराज्यंदत्वास्वयंबदरिकाश्रमंययौ तत्रस्नात्वा आसनंबध्वाजितमनाः सन् स्थूलेविराड्रूपेमनः दधार समाधिरू-
पः अभवत् ततः विमानंविमानस्थौस्रुनंदनंदौच प्राप्तौ दृष्ट्वाताभ्यांननाम तदासुनंदनंदावूचतुः भोजराजन् तेभद्रम् यः
त्वंपंचवर्षः देवंतर्पितवान् तस्यहरेः पार्षदौ त्वांभगवत्पदंनेतुंप्राप्तौविद्धि हेतातदुर्जयंपदंत्वयाजितम् अतः जगद्वंद्यंवि-
ष्णोः पदंआतिष्ठ मैत्रेयउवाच ध्रुवः एवंश्रुत्वामुनीन्प्रणम्यविमानंतौचनमस्कृत्यतत् आरोढुंऐच्छत् तदामृत्युः आगत्यआह
हेमहाराजमांअंगीकुरु ध्रुवउवाच तेस्वागतंक्षणंतिष्ठ एवमुक्त्वाध्रुवः विष्णोः स्मरणंकृत्वामृत्योः मूर्ध्निपदंदत्वा विमानं आरुहत्

तदास्वर्गेदुंदुभ्यादिवाद्यानिनेदुः गंधर्वाः जगुः पुष्पवृष्टयः पेतुः सः स्वर्लोकंगच्छन् जननींसस्मार तदाविष्णुपार्षदौअग्रेविमाने
नगच्छंतींसुनीतिंदर्शयामासतुः स्वर्गमार्गेदेवैः स्तुवद्भिः कुसुमैरवकीर्यमाणः ग्रहान् मुनींश्च अतिव्रज्य विष्णोःपदंअगात्
इतिध्रुवः त्रयाणांलोकानांचूडामणिरिवअभूत् नारदः ध्रुवप्रभावंप्रचेतसांसत्रेअगायत् ध्रुवस्यविक्रमंयोगिनोपिप्राप्तुं-
नालम् किंपुनर्नृपाः यः पंचवर्षः प्रभुंवशीकृतवान् मैत्रेयउवाच ध्रुवस्यचरितंतेकथितम् इदंधन्यंयशस्यंआयुष्यंस्व
र्ग्यंपापनाशकं एतत् श्रुत्वाभगवतिभक्तिः क्लेशक्षयश्च भवति पौर्णमास्यांसिनीवाल्यां द्वादश्यांश्रवणेदिनक्षयेव्यतीपातेसंक्र
मेरवौयः शृणुयात् यः श्रावयेत् ससिद्धिंआप्नोति इदंध्रुवाख्यानंतेकथितम् ५२ इतिचतुर्थेद्वादशः १२ सूतउवाच
मैत्रेयात् ध्रुवचरितंश्रुत्वाभगवद्भक्त्यापूर्णः विदुरः पप्रच्छ विदुरउवाच तेप्रचेतसः केकस्यान्वयेजाताः कुत्रसत्रं-
आसन्त नारदेन तत्रभगवत्कथाः वर्णिताः तदेतत् सर्ववद मैत्रेयउवाच ध्रुवस्यइडायांजातः उत्कलः पुत्रः पितरिव
नंगतेराज्यंनैच्छत् ब्रह्मनिष्ठत्वात् किंच आत्मनः अन्यंनैक्षत् तदावृद्धाः मंत्रिणः तंराज्यानर्हंमत्वा भ्रमेः सुतं कनिष्ठंवत्स
रंनामभूपतिं चक्रुः वत्सरः स्ववीथिपत्न्यांषट्सुतान् प्रासूत पुष्पार्णतिग्मकेतुंइषंऊर्जंवसुंजयमिति ६ वत्सरज्येष्ठपुत्र-
स्यपुष्पार्णस्यप्रभादोषाचद्वेभार्येतत्रप्रभासुताः ३ प्रातः मध्यंसायमिति दोषायासुतः प्रदोषः निशीथः व्युष्टइति व्युष्टस्य
पुष्करिण्यां सर्वतेजाः जातः सएव आकूत्यांपत्न्यां चक्षुःसंज्ञंमनुम् अजनयत् तस्मात् नड्वलायांएकादशपुत्राः पुरुः कुत्सः
त्रितः द्युम्नः सत्यवंतः धृतव्रतः अग्निष्टोमः अतीरात्रः प्रद्युम्नः शिबिः उल्मुकइति उल्मुकात् पुष्करिण्यां षट्पुत्राः अंगः सुम- ८
नसः ख्यातिः क्रतुः अंगिराः गयइति तत्रअंगस्यपत्नीमृत्युकन्यासुनीथानाम आसीत् सावेनंसुषुवे यद्दौःशील्यात् अंगःपुरात्

निरगात् यंमुनयः शेपुः गतासोस्तस्यदक्षिणं करंमुनयः ममंथुः तदानारायणांशः पृथुर्जातः विदुरउवाच साधोः अं-
गस्यदुष्प्रजाकथंअभूत् यस्माद्वेनंगतवान् धर्मकोविदाःमुनयः राज्ञिशापंकथंददुः एतत् वेनचेष्टितंमेआख्याहि यतःत्वंस
र्वज्ञोसि मैत्रेयउवाच एकदासःअंगोराजाअश्वमेधंचकार तदायज्ञेऋषिभिः आहूतादेवाः नाजग्मुः तदाविस्मिताः
ऋत्विजः अंगंऊचुः हे अंगत्वयाश्रद्धयाहवींषि संपादितानि देवताः नगृह्णंति तस्यकारणंनविदामः मैत्रेयउवाच
अंगःद्विजवचःश्रुत्वाखिन्नःसन् ब्राह्मणान् पप्रच्छ हेऋत्विजःदेवाःकुतोनायांति भागान् कुतोनगृह्णंति मयाकिंअपराद्-
म् तेऊचुः हेराजन् तेप्राक्तनंअघमस्ति यतःत्वंअप्रजोसि अतः यथापुत्रःस्यात् तथासाधय भगवान्पुत्रकामेष्ट्याइष्टश्चेत्
तेपुत्रंदास्यति ततःदेवाःभागंग्रहीष्यंति इतिव्यवस्यविप्राः राज्ञःपुत्रार्थेविष्णवे पुरोडाशंनिरवपन् तदाअग्नेःसकाशात् पा
यसंआदाय पुरुषः उत्तस्थौ राजाविप्राज्ञया पायसंगृहीत्वाअवघ्राय पत्न्यैददौ सातत्प्राश्यगर्भंदधार कालेपुत्रंसुषुवे सःबालः
मातामहंअनुव्रतः तेनअधार्मिकोजातः तस्यमृगघातादिरौद्रंकर्म दृष्ट्वा जनःअयंवेन इतिचुक्रोश सःक्रीडाकालेबालान् प-
शुवत् अमारयत् राजादुष्टंपुत्रंवीक्ष्य तंशासितुं अकल्पःसन् आह अहो येजनाः कुपुत्रजंदुःखंनविंदंति तैर्हरिः पूजितः ये-
नदुष्पुत्रेणदुष्कीर्तिः अधर्मःविरोधः आधिश्चदुःखदागृहाश्च भवंति एवंखिन्नःसन् निशीथे पलायितः प्रातःपुरोहितामात्या
दयःराजानंविचिक्युः तंअलब्ध्वापुरींएत्यरुदंतःराज्ञःअप्रासिंऋषिभ्योन्यवेदयन् ४९ इतिचतुर्थेत्रयोदशः १३ मैत्रे
यउवाच ततोभृग्वादयः नृणांरक्षणकर्त्रभावंदृष्ट्वा प्रजानाशंपश्यंतः दुष्टमपिवेनंराज्ये अभ्यषिंचन् तदादस्यवःआ
सनगतंवेनंश्रुत्वानिलिल्युः सःराज्यलक्ष्म्यामत्तःसन् साधून् अवमेने कदाचित्रथंआस्थायपृथिव्यांभ्रमन् भेरीघोषे-

ओ॰ ६ मृत्कम्

णनयष्टव्यंनदातव्यंनहोतव्यंइतिधर्मंन्यवारयत् तदामुनयः मंत्रिणश्चराज्ञः दुर्वृत्तंवीक्ष्यऊचुः अहोलोकस्यमहत्दुःखंप्रा
प्तं एषःपालकोभूत्वाप्रजाःहंति तथापिएनंसांत्वयेम तेनपातकंनस्पृशेत् यदिसःनश्रोष्यति तर्हितंदहिष्यामः इतिनिश्चित्य
वेनंगत्वाऊचुः हेनृपयत्विज्ञापयामहे तन्निबोध तेआयुःश्रीबलकीर्तीनांवृद्धिकरः धर्मः रक्ष्यः धर्मेनष्टेराजाऐश्वर्याद्भ्रश्यति
प्रजारक्षणेकृतेविश्वात्मातुष्यति तस्मिन्तुष्टेअप्राप्यंकिम् अतःत्वंयज्ञैः इक्ष्वाराज्यंपालयितुंअर्हसिइत्यादि वेनउवाच
हेब्राह्मणाःयूयंबालिशाः अधर्मेधर्ममानिनः अहोविष्णुविरिंच्यगिरिशाद्याः नृपतेःदेहेवसंति तस्मात्गतमत्सराः कर्मभिः
मांयजध्वम् येराजानंअसत्कृत्यकर्मकुर्वंति तेइहपरत्रचनसुखंविंदंति इत्यादि मैत्रेयउवाच पापीयान्वेनः ऋषि
वचः नमेने तदातेद्विजाः चुक्रुधुः अहोयःविष्णुंनिंदति अतःअयंराज्यंनार्हति एषःहन्यतां २ इतिव्यवस्यवेनंहुंकृतैःजघ्नुः त-
तोऋषयःस्वाश्रमंजग्मुः ततःसुनीथापुत्रदेहंयोगेनररक्ष ततःबहुकालेनऋषयः सरस्वतीतीरेस्थिताःसंतःसत्कथाश्च-
क्रुः तदामहोत्पातान्वीक्ष्यभुवः अभद्रंनभवेत् किं एवंमृशंतःस्थिताः तदाचोराणांउपद्रवंआज्ञाय तथाअराजकंदेशंआ-
ज्ञाय अहोअयंवंशःसंस्थातुंनार्हति इत्युक्त्वामृतवेनदेहस्यऊरुंममंथुः तस्मात्काककृष्णाः ह्रस्वांगःमहाहनुः ह्रस्वपाद
बाहुः ताम्रमूर्धजः पुरुषः अभवत् तंकिंकरोमीतिवादिनंनिषीदेति अब्रुवन् सनिषादःअभवत् तस्यवंश्याः गिरिकान
नगोचराःनैषदाःजाताः तेनपुरुषेणऋषयः वेनकल्मषंअहरन् ४६ इतिचतुर्थेचतुर्दशः १४ मैत्रेयउवाच अ
थविप्रैःपुनस्तस्यबाहुभ्यांमथ्यमानाभ्यांमिथुनंसमपद्यत तत्दृष्ट्वाभगवत्कलामितिज्ञात्वासंतुष्टाः ऊचुः एषःपुमान्सा
क्षात् विष्णोःकलाइयंकन्यालक्ष्म्याः कला अयंराज्ञांप्रथमः पृथुःनामराजाभविष्यति इयंकन्यापृथोःपत्नीअर्चिःनाम

भविष्यति अयंलोकरक्षकःस्यात् इत्यादिब्राह्मणाऊचुः तदागंधर्वाःजगुःसिद्धाःपुष्पवृष्टिंचक्रुः अप्सरसः ननृतुः दिविशंख
तूर्यमृदंगाद्याः नेदुः सर्वेदेवर्षिब्रह्माद्याः ययुः ब्रह्मापृथोः दक्षिणहस्तेगदाचिन्हं पादयोः पद्मचिन्हं दृष्ट्वाहरेः कलांमेने ब्राह्मणैः
तस्यअभिषेके आरब्धेसतिजनाः अभिषेकवस्तूनि आजन्हुः समुद्रः द्यौः पृथिव्यादयः उपायनानि आनिन्युः सः अभिषिक्तः
पृथुःपत्न्यासहअग्निरिवरेजे तस्मैकुबेरः हैमंसिंहासनंददौ वरुणः श्वेतछत्रम् वायुःव्यजने धर्मः स्रजम् इंद्रःकिरीटम् यमः
दंडं ब्रह्माकवचम् सरस्वतीहारम् हरिश्चक्रम् लक्ष्मीःसंपदम् रुद्रःअसिम् अंबिकाचर्म सोमःअश्वान् त्वष्टारथम् अग्निः
चापं सूर्यः इषून् भूःपादुके द्यौः पुष्पावलिम् खेचराः नाट्यंगीतंवादित्रंअंतर्धानम् ऋषयः आशिषःसमुद्रः शंखं सिंधवः
पर्वताः नद्यः रथमार्गं ददुः सूतमागधाद्याः तंस्तोतुंउपतस्थिरे तत्ज्ञात्वा पृथुः तान् इदमब्रवीत् हेसूताद्याः अधुनाअस्प
ष्टगुणस्यमेकिंस्तोतुं इच्छथ स्तव्यस्तुभगवान्उत्तमश्लोकएव तस्मात्स्पष्टगुणेमयिजातेमेस्तुतिंकरिष्यथ अधुनालोके
वयंकर्मभिः अविदिताःअतःमांबालकवत् कथंगापयिष्याम २६ इतिचतुर्थेपंचदशोऽध्यायः १५ मैत्रेयउवाच
इतिब्रुवाणंनृपतिंमुनिनोदिताः गायकाः तुष्टुवुः हेदेववर्य तेमहिमानुवर्णने वयंनसमर्थाः तेयशसिब्रह्मादीनामपिधियःबभ्र
मुः तथापिहरेरंशस्यतेमुनिनोदिताःसंतः मयाकर्माणिवितन्महि एषःधर्मभृतांश्रेष्ठः धर्ममर्यादागोप्ताढुष्टानांशास्ताभविष्य
ति सर्वपालानांतेजः तनौबिभर्ति कालेद्रव्यं उपादत्ते कालेविमुंचति सूर्यवत् क्षमयाधरित्रीव भूतानांअंतर्बहिः व्यापकत्वेन
वायुवत् दंडेयमवत् अवर्षणेसतिप्रजाः रक्ष्यति लोकंचंद्रवत् सुखयति अग्निरिवसोढुंअशक्यः अदंड्यंअरिसुतंनदंडय
ति स्वतमपिदंड्यं दंडयति अस्यमानसाचलपर्यंतं अप्रतिहतंचक्रंवर्तेन अयंआत्मचेष्टितैःलोकंरंजयिष्यति अयंभूतानां

ओ॰४ विस्तारयाम॰

शरण्यः वृद्धसेवकः अयंपरस्त्रीषुमातृभक्तिः सतांकिंकरः असाधुषुदंडपाणिरिव अयंपृथ्वीरक्षकः अस्मैनृपाः बलिंदास्यं
ति अयंगोरूपांमहींदुहेत् पृथ्वींसमांअकरोत् एषःशतंअश्वमेधान्आजहार चरमेऽश्वमेधेइंद्रः अश्वंअहार्षीत् एषःस्वगृहेप्रा
प्तंसनत्कुमारंआराध्यअमलंज्ञानंप्राप्स्यति किंच दिशःविजित्यस्वतेजसाउत्पाटितलोकशल्यः देवदैत्यैः उपगीयमानःभु
वःपतिर्भविता २७ इतिचतुर्थेषोडशः १६ मैत्रेयउवाच एवंगुणकर्मभिः ख्यापितःपृथुः सूतमागधादीन्ब्रा
ह्मणांश्चतोषितवान् विदुरउवाच धरित्रीगोरूपंदधारयांपृथुः दुदोह तत्र वत्सःकः दोहनंकिम् किंच पृथुनाइ
यंभूः कथंसमाकृता इंद्रः तस्यहयंकुतःजहार सः सनत्कुमारात् ज्ञानंलब्ध्वाकांगतिंगतः एतत् अन्यच्चभक्तायमेवक्तुंअर्ह
सि मैत्रेयउवाच यदाविप्रैः अभिषिक्तः पृथुःतदाप्रजाः एत्यपतिंअवोचन् हेराजन् वयंजठराग्निनातप्ताः त्वांशर
णंयाताः अतःनः अन्नंदातुंयत्नंकरोतु मैत्रेयउवाच प्रभुःप्रजानांदीनांवाचंनिशम्यदीर्घंदध्यौ ततःदुःखनिमित्तं-
ज्ञात्वाभूमिंहंतुंधनुषिबाणंसंदधे तदाप्रवेपमानागोरूपापृथ्वीअपलायत् पृथुःतांअन्वधावत् सात्रैलोक्यंभ्रांत्वा तत्रत
त्र पृष्ठतः एनंददर्श कुत्रापित्रातारंनलेभे तदापृथुंउवाच हेधर्मज्ञमांत्राहि योषांमांकथंहनिष्यसि हेवैन्य अजरांनौकारूपां
मांहत्वाप्रजाः आत्मानंचअंभसिकथंधास्यसि पृथुरुवाच हेवसुधेत्वांहनिष्यामि नित्यंयवसंजग्धि पूर्वंब्रह्म
णासृष्टानि औषधिबीजानि त्वयाग्रसितानि तानिनमुंचसि प्रजानां क्षुधंमद्बाणैर्विद्धायास्तेमांसेनशमयिष्यामि त्वांतिल
शः हत्वायोगबलेनप्रजाः धारयिष्यामि एवंक्रोधमूर्तिंबिभ्रतंपृथुंकंपायमानामहीप्राह धराउवाच परपुरुषा १०
यतेनमः येनविधात्राजीवानांस्थानंअहंनिर्मिता सएवमांहंतुंउपस्थितः अन्यंकंशरणंव्रजामि धर्मपरोभवान् कथंमांजिघां

सति हे अज त्वं पुरा रसातलात् सूकररूपेण मां उज्जहार सः त्वं कथं मां हंतुं अर्हसि ते चरितं केनापि न ज्ञायते अतः तेन मोस्तु
३६ इति चतुर्थे सप्तदशः १७ मैत्रेय उवाच एवं महीपृथुं स्तुत्वा भीता सती पुनः आह हे राजन् मे विज्ञापनं निबो
ध पूर्वं तत्त्वदर्शिभिः ये उपायाः दृष्टाः प्रयुक्ताश्च तान् यः आतिष्ठति सः श्रेयः प्राप्नोति पुरा ब्रह्मणा ओषधयः सृष्टाः ताः दुष्ट-
राजन्यैः भुज्यमानाः दृष्ट्वा लोके चोरीभूते सति अहं यज्ञार्थे ताः ओषधीः अग्रसम् ताः बहुकालेन मयि क्षीणा जाताः भवान्
योगेन आदातुं अर्हति हे वीर दोहनार्थे वत्सं दोहनं दोग्धारं च कल्पय यदि भवान् अन्नं वांच्छति तर्हि मां समां कुरु यथा मयि
मेघोदकं स्थिरं स्यात् इति श्रुत्वा राजा प्रीतः सन् मनुं वत्सं कृत्वा स्वहस्ते औषधीः अदुहत् ततोऽन्ये च दुदुहुः ऋषयः बृह-
स्पतिं वत्सं कृत्वा इंद्रियरूपपात्रे छंदोमयं दोहं अदुहन् देवाः इंद्रं॰ हिरण्यपात्रे अमृतं॰ दैत्याः प्रल्हादं अयः पात्रे सुरां॰ गंधर्वा
प्सरसः विश्वावसुं पद्मपात्रे वाङ्माधुर्यम्॰ पितरः अर्यमाणं आमपात्रे कव्यं॰ विद्याधरादयः कपिलम् नभः पात्रे खेचर-
त्वादि सिद्धिम्॰ मायिनः मयासुरम् धारणामयीं मायां॰ यक्षरक्षोभूतपिशाचाः रुद्रम् कपाले रक्तं॰ अहिनागाद्याः तक्षक
म् बिले विषं॰ पशवः नंदिनम् अरण्ये यवसं दंष्ट्रिणः मृगेंद्रं स्वकलेवरे क्रव्यं॰ विहगाः गरुडम् स्वपात्रे कीटफलादि॰ वनस्प
तयः वटम् रसमयं पयः गिरयः हिमाचलं स्वसानुषु धातून् एवं स्वे स्वे पात्रे भिन्नं॰२ पयः कामदुघां पृथिवीं दुदुहुः ततः प्रीतः
पृथुः पृथ्वीं दुहितृत्वे चकार स्वधनुः कोट्या गिरिकूटानि चूर्णयन् भूमंडलं प्रायः समं चक्रे अथ जनानां यथार्हतः निवासं
चक्रे ग्रामान् पुरः पत्तनानि दुर्गाणि विविधानि च घोषान् व्रजान् सशिबिरान् आकरान् खेटखर्वटान् इति पृथिव्यां पृथोः
पूर्वं पुरग्रामादिकल्पना नासीत् ततः अकुतोभयाः प्रजाः यथासुखं वसंति स्म ३२ इति चतुर्थे अष्टादशः १८

ओ॰५ मुखे, तृणम्॰

मैत्रेयउवाच अथएकदापृथुःब्रह्मावर्तेमनोःक्षेत्रेयत्रप्राचीसरस्वती तत्रशताश्वमेधानांसंकल्पंअकरोत् इंद्रःतत्कर्म
नसेहे यत्रब्रह्मशर्वाभ्यांहरिःप्रत्यक्षंअदृश्यत यत्रच गंधर्वमुन्यप्सरसः विद्याधरदैत्यदानवगुह्यकादयः सुनंदनंदप्रमुखाः
कपिलनारददत्तसनकादयश्च आययुः यस्मिन्यज्ञेभूमिः पृथोःसर्वकामदुधाआसीत् नद्यः सर्वरसान् ऊहुः तरवःफला-
नि प्रासूयंत सिंधवः रत्नानि गिरयःअन्नम् सर्वेलोकपालाः उपायनानि आजह्रुः एवंपृथुप्रभावंअसहमानः इंद्रःचरमेऽश्व
मेधे पाखंड वेषंकृत्वा अश्वंजहार तंअत्रिःऐक्षत् ततःअत्रिनोदितः पृथुपुत्रः तंअन्वधावत् तंपाखंडवेषादिगृहीतं दृष्ट्वाअ
यंधार्मिकइतिबुध्याबाणंनामुंचत् अत्रिः वधात्निवृत्तंतंदृष्ट्वा हेतातइमंइंद्रंयज्ञहनंजहिइतिआह ततःपृथुपुत्रःइंद्रंप्रति
गतः तदाइंद्रःअश्वंतद्रूपंचहित्वा अंतर्हितःसवीरःअश्वंआनीययज्ञंययौ तदाऋषयःविजिताश्वइति तस्यनामदधुःएवं
बहुवारंपाखंडमार्गेषुनृणांबुद्धिःअभवत् तदाकुपितःपृथुःइंद्रंहंतुंबाणंआददे तदाऋत्विजःतंनिवारयामासुःअस्मि-
न्यज्ञेहेपृथोपशुंविनाअन्यवधःयोग्योन वयंमंत्रैःतवाहितंइंद्रंहोष्यामः इत्युक्त्वाऋत्विजःस्रुक्हस्तान्जुह्वतः प्रतिब्र-
ह्माएत्यन्यषेधत् हेऋत्विजः भगवत्तनुः इंद्रः वधार्होन पृथोःएकोनशतक्रतवः भवंतु पृथुंप्रत्याह हेनृप क्रतुभिःअलम्
भवान् मोक्षधर्मवित्अस्ति एषःक्रतुःविरमताम् इंद्रनिर्मितैःपाखंडैःजनाः अधर्मेयांति त्वंतु धर्मंपातुं विष्णुकलयाअ
वतीर्णोसि अतःहेप्रभोपाखंडमार्गंजहि मैत्रेयउवाच ततब्रह्मवाक्यंश्रुत्वायज्ञाग्रहंहित्वाइंद्रेणस्नेहंकर्त्तुं ऐ
च्छत् ततःअवभृथस्नानंचकार देवाःतस्मैवरान्ददुः लब्धदक्षिणाःब्राह्मणाः आशिषोददुः हेमहाबाहोवयंत्वयाआ
हूताः सर्वेसमागताः दानमानाभ्यांपूजिताः सर्वेसंतुष्टाःस्म ४२ इतिचतुर्थेएकोनविंशः१९ मैत्रेयउवाच

भगवान् वैकुंठः मघवता सह तुष्टः सन् पृथुं अभाषत श्रीभगवानुवाच हे राजन् एषः ते यज्ञभंगं अकरोत् तत् क्षंतुं अर्हसि लोके साधवः अनात्मनः देहस्य अभिमानेन भूतेभ्यः न द्रुह्यंति त्वादृशाः देवमायया यदि मुह्यंति तर्हि ज्ञानवृद्धानां सेवया श्रम एव जातः अतः मायोत्पन्ने शरीरे गृहे अपत्ये द्रविणे वा बुधः कः ममतां कुर्यात् आत्मा तु एकः शुद्धः तं स्वस्मिन् स्थितं पुरुषं यः वेद सः प्रकृतिस्थोपि तद्गुणैः न लिप्यते यः निष्कामः स्वधर्मेण नित्यं मां भक्त्या भजते तस्य मनः शांतिं एति सः कैवल्यमश्नुते अतः मयि मनो निधाय प्रजापालनं कुरु अहं संयतचित्तस्य यथा सुलभः तथा यज्ञादिभिर्न अतः परं वरं वृणु

मैत्रेय उवाच सः लोकगुरोः आज्ञां शिरसा जगृहे इंद्रः पादयोः स्पृशंतं परिष्वज्य द्वेषं विससर्ज सः भगवता वरार्थं नोदितः हरिं हृदि उपगुह्य अश्रुलोचनः हरिं द्रष्टुं नाशकत् अथाश्रुकलाः विमृज्य हरिं विलोकयन् पृथुः भगवंतं आह हे विभो वरदेश्वरात् त्वत्तः बुधः सन् बंधकान् वरान् कथं वृणीते हे कैवल्यपते यत्र ते यशः श्रवणादि सुखं नास्ति तादृशं कैवल्यमपि न कामये तर्हि ते यशः श्रवणार्थं कर्णायुतं देहि एष एव मे वरोस्तु अहं पद्मकरा लक्ष्मीरिव ते चरणांबुजं भजे तत्र लक्ष्म्याः मम च कलिः मा भूत् हे जगदीश भक्तैः अर्पितं अल्पमपि त्वं उरु करोषि हे दीनवत्सल यथा पिता बालहितं स्वयं चरेत् तथा नः ईहितं कर्तुं त्वमेव अर्हसि मैत्रेय उवाच इति आदिराजेन नुतः भगवान् आह हे नृप मयि ते भक्तिः अस्तु मया आदिष्टं त्वं कुरु मदाज्ञाकरः लोकः सर्वत्र शोभनं आप्नोति मैत्रेय उवाच इति राज्ञा सभाजिताः सर्वे स्वस्थानं ययुः भगवानपि इंद्रेण साकं स्वधाम प्रत्यगात् पृथुः देवदेवाय नमस्कृत्य स्वपुरं ययौ ३८ इति चतुर्थे विंशः २० मैत्रेय उवाच अथ मौक्तिकैः दुकूलैः तत्र तत्र मंडितं पुष्पाक्षतफलैः लाजैः दीपैः अर्चितं पुष्पफलयुक्तैः कदलीस्तंभैः पूगवृक्षैश्च शोभितं पुरं-

भा॰च॰ गत्वातत्रशंखवादिवाद्यघोषेणअनेकसंपद्भिः युक्तंस्वगृहंसर्वैःस्तूयमानः पृथुः प्रविवेश सःपरंसिंहासनंआरुह्यभूयांसिक- चू॰
१२ र्माणिकुर्वन्पृथ्वींशशास विदुरउवाच विप्रैःअभिषिक्तः पृथुःकिंचकार अस्यकीर्तिंकःनशृणोति सर्वेभूपालाः अद्यापि
यद्विक्रमोच्छिष्टंआचरंति तस्यशस्तंकर्मवद मैत्रेयउवाच पृथुःअंतर्वेद्यांवसन् ससद्वीपैकदंडकृत् ब्राह्मणकुलाद्वै
ष्णवाच्च अन्यत्र अस्खलितादेशःआसीत् एकदातत्रमहासत्रदीक्षाआसीत् तत्रदेवानांब्रह्मर्षीणांराजर्षीणांपित्रादीनांसमा
जःबभूव तत्समाजेस्वयंउत्थितःसन् सभ्यान् उवाच हेसभ्याः वःभद्रम् धर्मजिज्ञासुभिः सत्सुस्वमनीषितंनिवेद्यम् अहंप्र-
जानांइहराजायोजितः ब्रह्मवादिनः यत् आहुः तत्राज्ञाआचरितंचेत् तस्यकामदुघाःलोकाःस्युः हेप्रजाः स्वधर्ममेव अधोक्षजधि
याकरुत हेदेवाद्याः यूयंतत् अनुमोदध्वम् कर्तुःशास्तुःअनुज्ञातुःफलंतुल्यम् तपस्विनः भगवत्पादसेवयाअशेषजन्मसंचितं-
धियःमलंत्यजंति येनभगवच्चरणाश्रयःकृतःसःक्लेशवहांसंसृतिंनप्रपद्यते तद्भक्तिमूलंब्राह्मणाः अहोहरिःयच्चरणाभिवंदना
त्स्थिरांलक्ष्मींयशश्च आप अनंतःब्राह्मणमुखेहुतंयथाअश्नाति तथाअग्नौन येनित्यंसमाधिनाब्रह्मबिभ्रति तेषांपादरेणुं-
अहंकिरीटेनवहामि एवंश्रेष्ठंब्रह्मकुलंतथाजनार्दनश्चमह्यंप्रसीदताम् मैत्रेयउवाच इतिब्रुवाणंनृपतिंपितृदेवद्वि
जातयःसर्वेतुष्टुवुःपुत्रेणजयतेलोकान् इतिसत्यवतीश्रुतिः वेनःब्रह्मदंडहतोपि नरकंत्वत्तःअतरत् हेवीरयस्यतेहरौईदृशी
भक्तिः अतःत्वंशाश्वतीःसमाःजीव अहोवयंत्वयानाथेनसनाथाःस्म नःअद्यत्वयातमसःपारःदर्शितः अतःविशुद्धसत्वायत-
स्मैतेनमोस्तु ५१ इतिचतुर्थेएकविंशः२१ मैत्रेयउवाच एवंपृथुंप्रतिजनेषुप्रगृणत्सुसत्सु तत्रचत्वारःसूर्यवर्चसः सनत्कु- १२
मारादयःमुनयःआकाशात्उपजग्मुःपृथुःतान्दृष्ट्वाहाटकासनेउपविश्यभक्त्याविधिवत्पूजयामास तत्पादशौचसलिलैः स्वा

त्मानंमार्जयित्वाप्राह हेद्विजाः मयाकिंमंगलंआचरितं वःदर्शनंयोगिनामपिदुर्लभंतन्मेप्राप्तंविप्राः यस्यप्रसीदंति तस्यशि
वःविष्णुश्चप्रसीदति हेमुनयःवःस्वागतंअस्तुअस्मिन् भवे अंजसाक्षेमंकेनभवेत् तत् युष्मान् पृच्छामि अजःभक्तानांभवायसि
द्धरूपीनित्यंचरति सनत्कुमारउवाच हेमहाराजत्वयासाधुपृष्टं साधूनांसंगमःउभयोःसंमतः हेराजन् हरेः गुणानुश्रव
णेभक्तः याप्रीतिरस्तिसामनोमलंधुनोति शास्त्रेषुनृणांइयान् एवअर्थः क्षेमायसुनिश्चितः वैराग्येणनिर्गुणेब्रह्मणिदृढार
तिःभवतितयाअहंकारोनश्यति सःयोगेनक्रमात्मुच्यते तस्मात् हेराजन् स्थिरचराणांहृदियःप्रकाशते सएवअहमस्मीतिअ
वेहि संतःयत्पादभक्त्याहृद्ग्रंथिंछिंदंति तंवासुदेवंभज मैत्रेयउवाच एवंब्रह्मपुत्रेणदर्शितात्मगतिः सःउवाच
राजोवाच पूर्वमेवहरिणामेअनुग्रहःकृतः तंसंपादयितुंयूयंप्राप्ताः अतःप्राणादाराःसुताब्रह्मन् ग्रहाश्वसपरिच्छदाः
राज्यंबलंमहीकोशइति सर्वंभवतांनिवेदितं मैत्रेयउवाच आदिराजेनपूजिताः सनकादयःस्वंप्रतिजग्मुः ततःपृथुः
कर्मफलंब्रह्मणिविन्यस्यअर्चिषिपंचपुत्रान्जनयामास विजयाश्वंधूम्रकेतुंहर्यक्षंद्रविणंवृकम् एवंपुत्रानुत्पाद्यसर्वेषांलोक
पालानांपृथक्पृथक्गुणान् एकःदधार किंच यःपृथुःद्रव्यग्रहत्यागयोःसूर्यवत् अग्निरिवदुर्धर्षः इंद्रइवदुर्जयःक्षमयाभूरिव
सागरइवदुर्बोधः धैर्येमेरुवत् शिक्षायांयमवत् कुबेरइवधनी सौंदर्येकंदर्पइवइत्यादिविशिष्टःराजात्रैलोक्येकीर्त्यासतांक
र्णरंध्रेषुरामइवप्रविष्टःआसीत् ६२ इतिचतुर्थस्कंधेचूर्णिकायांद्वाविंशोऽध्यायः २२ मैत्रेयउवाच वैन्यः
एकदाआत्मानंवृद्धंदृष्ट्वासंपादितेश्वराज्ञःआत्मजेषुपृथ्वींन्यस्यप्रजासुविमनासुसतीषुसदारःतपोवनंअगात् तत्रउग्रंतपः
आरब्धवान् किंचित्कालंकंदमूलफलाहारःक्रमात् अप्भक्षःवायुभक्षः ग्रीष्मेपंचतपाः वर्षासुपर्जन्यसहःशिशिरेउदके

आकंठमग्नः एवंवृत्तः सनत्कुमारोपदिष्टयोगेन पुरुषंअभजत् तदातस्यब्रह्मणि अनन्यविषया भक्तिर्जाता तयाज्ञानंविरक्तिश्च
अभूत् तेनजीवकोशंचिच्छेद एवंसः आत्मनि आत्मानंसंयोज्यकाले ब्रह्मभूतः सन् वायूत्क्रमणमार्गे षट्चक्रभेदंकृत्वा भक्ति
ज्ञानवैराग्यवीर्येणस्वरूपस्थः सन् प्रभुःदेहंजहौ तत्पत्नी अर्चिर्नाम पतिदेहं विपन्नं दृष्ट्वा किंचिद्विलप्य अद्रिसानुनिचितांआरो-
प्य तत्कालोचितं कृत्यंविधायस्नात्वाभर्तुः उदकंदत्वादिविस्थान् त्रिदशांश्चनत्वावन्हिंत्रिः परीत्य भर्तृपादंध्यायती वन्हिंविवे
श तदासहस्रशोदेवपत्न्यः तुष्टुवुः कुसुमवृष्टिंकुर्वत्यः अमरतूर्येषुनदत्सुपरस्परंगृणंतिस्म देव्यऊचुः अहोइयंवधूः ध-
न्यायतः सर्वात्मनापतिंभेजे किंच याअस्मान् अतीत्यपत्यासहऊर्ध्वंव्रजतितांपश्यत भुवियेलोलायुषः तेपिहरिभक्त्यामोक्षं-
साधयंतिकिमाश्चर्यम् मैत्रेयउवाच एवंस्तुवंतीषुवधूःपतिलोकंगता पृथुः भगवद्रूपतांप्राप इत्थंपृथुचरितंतेकथितम्
इदंपुण्यंयः पठेत् शृणुयात् श्रावयेद्वा सः पृथोःपदवींइयात् स्वर्ग्यं आयुष्यंधन्यंधर्मकामार्थमोक्षदं इदंश्रुत्वा अप्रजःसुप्रजःनि
र्धनः धनी मूर्खःपंडितोभवेत् ३९ इतिचतुर्थेत्रयोविंशः २३ मैत्रेयउवाच पृथुपुत्रः विजिताश्वः भ्रातृभ्योदिशः
ददौ हर्यक्षायप्राचीं धूम्रकेशायदक्षिणाम् वृकायप्रतीचीम् द्रविणसेउदीचीमादिशत् ततःसः विजिताश्वः शिखंडिन्यांपावकः
पवमानः शुचिरिति पुत्रत्रयंजनयामास अग्नयएवते वसिष्ठशापात् उत्पन्नाः पुनः अग्नित्वंतेप्रापुः सएवंनभस्वत्यांअन्य
भार्यायांहविर्धानंअजनयत् सः हविर्धानः राजवृत्तिंदारुणांमत्वा दीर्घसत्रव्याजेनतांत्यक्त्वा हरिंयजन् तल्लोकंप्रापहविर्धानात् ह
विर्धान्यांषट्पुत्राः जाताः बर्हिषत् गयः शुक्लः कृष्णः सत्यः जितव्रतः तत्रबर्हिषत् कर्मकांडेषुनिपुणः प्राचीनाग्रकुशैः येन भूमिः १३
आस्तृता तेनतस्यप्राचीनबर्हिरितिनामजातम् सः समुद्रकन्यांशतद्रुतिंउपयेमे तस्यांप्राचीनबर्हिः प्रचेतसोनामधर्मपारगान्

दशपुत्रान् जनयामास तेचदशप्रचेतसः पित्राप्रजासर्गेआदिष्टाः संतःपितुः वाक्यंशिरसा आदायतपः कर्तुंप्रतीच्यांदिशि समु-
द्रंययुः तत्रसमुद्रवत् विस्तीर्णंएकंसरः अपश्यन् तत्रदिव्यंगानंआकर्ण्यविस्मयंगताः तदैवतस्मात् सरसःनिष्क्रामंतंअमरप्र-
वरंसहानुगंप्रसादसुमुखंत्रिलोचनंशिवंवीक्ष्यजातानंदाः तंप्रणेमुः प्रपन्नार्तिहरः शिवःप्रीतः सन् धर्मज्ञान् तान् उवाच
श्रीरुद्रउवाच हेबर्हिषदःपुत्राः वःचिकीर्षितंविदितं वः अनुग्रहायमेदर्शनंकृतम् यःवासुदेवंप्रपन्नः सःमेप्रियः यूयंभगव
त्प्रियाः अतःमेप्रियास्थ अथइदंस्तोत्रंमयावक्ष्यमाणंश्रूयताम् इत्युक्त्वाबद्धांजलीन् कथयामास जितंतेआत्मवित् धुर्यइत्या
दि तेउत्कर्षः हेभगवन् त्वंपरमानंदरूपेणनित्यंस्थितः अतः एवंभूतायपंकजनाभायवासुदेवायप्रद्युम्नायअनिरुद्धायसंकर्षणा
यसोमसूर्याग्निसोमजलपृथ्वीवायुनभोरूपायतेनमः रुद्रब्रह्मरूपायचतेनमः इत्यादिस्तुत्वादर्शनंप्रार्थयते स्वानांभक्तानांस्व
स्यरूपंदर्शयइत्युक्तान् तान् आह हेनृपनंदनाः सर्वभूतेषुआत्मनिचस्थितंहरिंपूजयंतः ध्यायंतः गृणंतश्चइदंजपत वःभद्रम-
स्तु पुरा अस्माकं भृग्वादीनांच ब्रह्माइदमेवाह ततःब्रह्मणाप्रजासर्गे आदिष्टाः वयं अनेनस्तोत्रेणविविधाःप्रजाः सृष्टवंतः अथ
इदंनित्यंयःजपेत् सः अचिरात् श्रियंप्राप्नुयात् सर्वश्रेयसम् यत्ज्ञानंश्रेष्ठंतत् अस्मात् लभ्यते किंच पुरुषः यद्यदिच्छतितत् अ
स्मात् मद्गीतात् सर्वेविंदते हेराजपुत्राः प्रचेतसः मद्गीतंजपंतः महत्तपःचरध्वम् ततः अंतेईप्सितंप्राप्स्यथ ७९ इतिचतु
र्थेचतुर्विंशोऽध्यायः २४ मैत्रेयउवाच भगवान् शिवः एवंसंदिश्यप्रचेतोभिः पूजितःसन् तत्रैवअंतर्दधे ततःप्रचेतसः
रुद्रगीतंजपंतःजलेप्रविश्यवर्षाणामयुतंतपस्तेपुः एवंप्रचेतसांकथांआसमाप्य तत्पितुः वृत्तांतमाह हेविदुरप्राचीनबर्हिषंक-
र्मसुआसक्तंदृष्ट्वाकृपालुः नारदः एत्यतंप्रबोधयत् नारदउवाच हेराजन् इहकर्मणाश्रेयःईहसेतत् मोक्षरूपंश्रेयः

कर्मणानभवति राजोवाच हेमहाभाग कर्मापविद्धधीः अहंश्रेयः नजानामि अतः मेज्ञानंब्रूहि नारदउवाच
हेराजन् यज्ञादिषुयान्पशून्संज्ञापितवान् असितेत्वयिमृतेसति अयंःकूटैःशृंगैः त्वांपरलोकेछिंदंति एतद्विषये नवजीवबुद्धिदं-
पतिरूपेणपुरंजनसंज्ञकराजचरितरूपंइतिहासंकथयिष्यामि तंपारोक्ष्येणशृणु हेराजन् कश्चित्पुरंजनो नामराजा आसीत्
तस्य अविज्ञातनामासखा आसीत् सः राजापुरंअन्वेषमाणः भूतलेबभ्राम एकदा भूतलंभ्रमन्हिमवतः दक्षिणेभागे नवद्वा
र्भिः युक्तंपुरंददर्श तस्यबहिः उपवनेएकांस्त्रियं ऐकैकैशतनायकैः दशभिः भृत्यैः सहआयांतीं पंचशीर्षाहिनागुप्तांभर्तारंइ-
च्छंतींउत्कृष्टरूपांयदृच्छयाप्राप्तांप्रमदोत्तमांदृष्ट्वा संमुग्धतांउवाच हे कंजपलाशाक्षित्वंकस्यासि कुतःप्राप्तासि इमांउपपुरीं
आलक्ष्यकिंकर्तुंइच्छसि एते अनुपथाः एकादशमहाभटाः के एताः ललनाः काः त्वंभवानीरमासरस्वतीवाअसिकिम् हेशो-
भने त्वयोपसृष्टः कामः मांबाधते तस्मात् अनुग्रहाण इत्थंयाचमानंपुरंजनंसाअभ्यनंदत् सापितंदृष्ट्वामोहितासती आह हेपुरुष
र्षभ ममतवचकर्तारंयेनचइयंपुरीनिर्मितातंचापिवयंनविद्मः एतेमेसखायः सख्यश्चसंति मयिसुप्तायांअयंनागः पुरींपालयन्जा
गर्ति हेनृप त्वंअत्रागतोसि एतन्मेदिष्ट्या त्वंयान्विषयान् अभीप्ससे तान्संपादयिष्यामि हेविभोमयासहकामभोगान् शतंसमाः
इमांपुरींआश्रित्यभुंक्ष्व नारदउवाच एवंतौदंपतीनिश्चित्यपुरींप्रविश्यवर्षशतंमुमुदाते यस्याः पुर्याः सप्तउपरिद्वारा-
णि तत्रपंचपूर्वतः द्वेदक्षिणोत्तरे अधः द्वेतत्रद्वारद्वयेनपश्यति द्वयेनजिघ्रति एकेनखादति दक्षिणोत्तराभ्यांदक्षिणोत्तरसंज्ञौपं-
चालदेशौयाति एकेन अधोद्वारेणव्यवायसुखंगृह्णाति अपरेणमलंत्यजति पुर्याः चत्वारः अंधसंज्ञकाः दासाः संति तत्रद्वा- १४
भ्यांयाति द्वाभ्यांकरोति एवंपुरंजनः कर्मासक्तः सन्स्त्रीयथाकरोति कदाचित् तस्यांमदिरांपिबंत्यांस्वयंपिबति अभ्रं-

ओ॰२ लोहयंत्रमयैः ओ॰५ प्रत्येकंशतानांस्त्रीणांपतिभिः ओ॰६ पुर्याः समीपस्थां ओ॰७ अनुवर्तिनः ओ॰८ प्रेरितः

त्यांअश्नाति रुदंत्यांरुदति हसंत्यांहसति जल्पंत्यांजल्पति एवंसायद्यत् करोति तत्तदेव अयमपिकुरुते एवंमहिष्यावंचितः क्री
डामृगइवअनुकरोति अज्ञवत् ६२ इतिचतुर्थेपंचविंशः २५ नारदउवाच एकदासःराजा एँकादशँचमूनाँथःधनु
र्बाणान् प्रगृह्यरथंपंचेंद्रियरूपाश्वंअहंममनारूपद्विदंडिकंपुण्यपापरूपद्विचक्रम् प्रधानाक्षं त्रिगुणध्वजम् पंचप्राणबंधन
म् मनःप्रग्रहं बुद्धिसूतं हृदयनीडम् द्वौशोकमोहौयुगबंधनस्थानं यस्यतम् पंचविषयप्रहरणम् सप्तधातवः रक्षार्थआवरणा
नियस्यतं पंचकर्मेंद्रियगतिप्रकारं एतादृशंस्वप्नदेहरूपंरथंआस्थाय पंचविषयरूपंवनंप्रविश्य विवेकवतींबुद्धिरूपांस्त्रियं
गृहेविहाय अनेकविषयरूपान् मृगशशादीन्न्यहनत् ततः बाणैः हतानांमृगाणांनाशः अभूत् ततः मृगयायांशशान् वराहान्
महिषान् गवयान् रुरुशल्लकान् अन्यांश्वनिघ्नन् श्रांतः गृहंएत्यस्नानादिकृत्वा कामविद्धः गृहिणींसस्मारतदातांअदृष्ट्वादासीः
अपृच्छत् हेदास्यः साललना क्वास्ति यामांउद्धरते यदिनस्यात् गृहेमातापत्नीवा पतिदेवता व्यंगेरथइवप्राज्ञः कोनामासीतदीन
वत्१ एवंश्रुत्वादास्यऊचुः हेनरनाथत्वत्प्रियायत् इच्छति तत् वयंनजानीमः भूतलेशयानांतांपश्य तदापुरंजनः स्वमहिषींनिरी
क्ष्यतस्याः संगेनअतिव्याकुलतांगत्वातांसांत्वयित्वा तस्याः पादौस्पृष्ट्वातांउत्संगेआरोप्य उवाच हेसुभ्रूः हेरुदति त्वन्मुखंहा-
स्यावलोकयुतंमांदर्शय वल्गुवाक्यंचवद हेममभार्ये येतवकृतापराधाः तेषुब्रह्मकुलात्मुररिपोः दासात् अन्यत्र दंडंकरोमिइ
तःपूर्वंत्वन्मुखंवितिलकंनपश्यामि इदानीमेवकुतः एवंजातम् तस्मात् कृतकिल्बिषस्यत्वां अदृष्ट्वामृगयांगतस्यमेप्रसीद
अहोस्त्रीवशगतंत्यक्तधैर्यंपुरुषंकामुकास्त्री कर्तुंयोग्येर्थेकानभजेत् २६ इतिचतुर्थेषड्विंशः २६ नारदउवा-
च हेप्राचीनबर्हिः इत्थंपुरंजनीपुरंजनंविभ्रमैः वशंआनीयपतिंरमयंती रेमेसः तथाआलिंगितकंठः एकांतगुह्यभाषणैः
ओ॰ २ मनःसेनापतिर्यस्य॰

गतविवेकः स्त्रीपरिग्रहः सन् दिवारात्रिरूपं आयुर्व्ययं नबुबुधे तया अभिभूतः सन् स्वस्वरूपं ब्रह्म तत्साधनं ज्ञानं च न सस्मार
एवं तया सह रममाणस्य नवं वयः क्षणार्द्धमिव व्यतिक्रांतं पुरंजनः तस्यां एकादश शतानि पुत्रान् दशोत्तरशतं कन्याश्च जनयामास
तदा तस्य आयुषः अर्द्धं अभूत् तेषां तासां च विवाहान् अकरोत् एकैकस्य शतं शतं पुत्राः अभवन् यैः पुरंजनवंशः समेधितः एवं सः
विषयेषु अनुबद्ध्यत सः पुरंजनः दीक्षां गृहीत्वा घोरैः पशुमारकैः क्रतुभिः देवादीन् ईजे यथा भवान् एवं कुटुंबे आसक्तस्य सतः जरा
रूपः कालः आजगाम सः चंडवेगो नाम गंधर्वाधिपतिः तस्य षष्ट्युत्तर शतत्रयं सेवकाः गंधर्वाः तावत्यः सितासिताः गंधर्व्यः दास्यः
एवं सः चंडवेगः सविंशतिसप्तशतैः सैन्यरूपैर्युक्तः पुरंजनपुरं हर्तुं आरेभे तदा तैः साकं पंचशीर्षप्रजागरः शतं समाः युयुधे सः
बले क्षीयमाणे परां चिंतां आप सः पुरंजनः पुर्यां स्वपार्षदैः इंद्रियैः आनीतं बलिं गृह्णन् स्त्रीजितः भयं नाविंदत् हे राजन् एतस्मि
न् काले कालस्य कन्या जरानाम्नी पतिं इच्छती त्रिलोकीं बभ्राम तां कश्च नैच्छत् कदाचित् सा अटमाना मां पथि दृष्ट्वा वर्तुं ऐच्छत् म
यि क्रुद्धे सति मां शापं अदात् हे मुने एकत्र स्थातुं नार्हसि तदा मया उपदिष्टा सा भयं नाम पतिं वव्रे सः यवनेश्वरः भयनामा कालकन्या
याः वचः श्रुत्वा सस्मितं तां अभाषत हे कालकन्ये मया आत्मसमाधिना तुभ्यं अयं लोकः पतिः निरूपितः त्वां अभद्रां असंमतां
इति मत्वा कश्चित् जनः नाभिनंदति अतः त्वं मे सेनया सह याहि प्रजानाशं प्रणेष्यसि अयं प्रज्वानो नाम ज्वरः मम भ्राता त्वं च
मे भगिनी भव उभाभ्यां सह अहं अस्मिन् लोके अव्यक्तः सन् चरामि ३० इति चतुर्थे सप्तविंशः २७ नारद उवा
च हे बर्हिष्मन् भयनाम्नः सैनिकाः प्रज्वारकालकन्याभ्यां जरत्पन्नग पालितां पुरंजनपुरीं एकदा रुरुधुः तत्र कालक- १५
न्या तस्य पुरं बुभुजे यवनाः द्वार्भिः रोगरूपेण प्रविश्य तां प्रादर्शन् ततः पुरंजनः उरुविधान् तापान् आप पुत्रादीन् स्मरन् तस्य-

ओ॰२ इंद्रियपरिणामान्॰ २ बुद्धिवृत्तीः ओ॰ ३ कर्माणि॰ ओ॰५ दिवसाः ओ॰५ रात्र्यः

तीकारंनलेभे तदाप्रज्वारः भयनाम्नः भ्रातुःप्रियचिकीर्षया तांपुरींददाह शिथिलावयवः राजा यवनैः रुद्धः सन् सर्वं अहं ममेति स्त्रीकृत्य पु
रीवियोगकाले स्त्रियं शोचन् तामेव दध्यौ तदाबलीयसा यवनेन विकृष्यमाणः अज्ञानाविष्टः सन् पूर्व सखायं न सस्मार तेन यज्ञे ये ह
ताः पशवः ते कुठारमयैः शृंगैः तं चिच्छिदुः सः स्त्रीसंगदूषितः शाश्वतीः समाः अनंत पारे तमसि मग्नः आर्तिं अनुभूय तामेव मनसा
ध्यायन् अनंतरं विदर्भराज्ञः कन्या बभूव तां मलयध्वजः पांड्यः युधि राजन्यान् निर्जित्य उपयेमे सः तस्यां सप्त पुत्रान् एकां कन्यां च
प्रासूत तेषां सप्तानां अर्बुदं अर्बुदं एकैकस्य पुत्राः अभवन् तां मलयध्वजकन्यां अगस्त्यः उपयेमे तस्यां दृढच्युतो मुनिः जातः तस्य इ
ध्मवाहः पुत्रोऽभूत् सः मलयध्वजः तनयेभ्यः क्ष्मां विभज्य कृष्णं आराधयितुं ताम्रपर्णीतीरे गत्वा वैदर्भ्या सह तपः चचार ब्रह्मणि
आत्मानं योजयित्वा सः पांड्यः देहं जहौ तदा पतिव्रता वैदर्भी किंचित् विलप्य चितिं कृत्वा पतिदेहं उपरि निधाय प्रदीप्य अंतः प्रवेष्टुं म
नो दधे तदा पूर्वतरः कश्चित् सखा ब्राह्मणरूपेण एत्य तां अबोधयत् त्वं कासि अयं ते कः मां सखायं स्मरसि किम् हे सखे मां हित्वा भौ
मसुखं भोक्तुं त्वं गतः त्वं विदर्भदुहिता न अयं ते पतिर्न त्वं पुरंजनः पुरंजन्या नवमुखे पुरे रुद्धः इयं माया मया सृष्टा आवां हंसौ आव-
योः गतिं पश्य अहं भवान् त्वं च अहं एवं विचक्ष्व एवं मानसः हंसः हंसेन प्रतिबोधितः सन् पूर्वनष्टां स्मृतिं आप नारदउवाच
हे बर्हिष्मन् एतत् अध्यात्मं तव पारोक्ष्येण मया प्रदर्शितं यस्मात् देवः परोक्षप्रियोस्ति साक्षात् आत्मज्ञानकथनेन तव चेत-
सि कथा नायाति अतएव मुक्तम् ६५ इति चतुर्थे अष्टाविंशः २८ प्राचीनबर्हिरुवाच हे भगवन् वयं कर्ममोहिताः तेव
चः सम्यक् न विदाम ज्ञानिनः जानंति अतः स्पष्टतया वद नारदउवाच जीवं पुरंजनं विद्यात् अस्य सखायं ईश्वरं शरणं ना

ओ॰४ श्रवणादिभक्तिमार्गान् ओ॰४ कृष्णसेवारुचिम् ओ॰५ भक्तेः अनेकप्रकाराः ओ॰५ मनः

मम भोगायतनं देहम् नवद्वारं द्विहस्तांघ्रिम् विद्यात् स्त्रियं विवेकवर्तीं बुद्धिं तस्याः सखायः ज्ञानकर्मेंद्रियाणि याः सख्यः ताः इंद्रियवृत्त
यः पंचशीर्षोरगं प्राणं गृह दुलं मनः पंचालान् विषयान् नवद्वारयुक्तं मनुष्यशरीरं वि॰ अक्षिणी नासिके कर्णौ मुखमिति सप्तोर्ध्व द्वारा
णि शिश्नगुदे अधो द्वारे वि॰ तत्रपुरः पंचद्वाराणि अक्षिणी नासिके मुखमिति दक्षिणद्वारं दक्षिणकर्णं उत्तरद्वारं उत्तरकर्णं वि॰ अंधच
तुष्टयं द्वौ करौ द्वौ पादौ अंतःपुरं हृदयम् विषूचीः मनः तत्र मोहं प्रसादं हर्षं वा प्राप्नोति उक्तोयः रथः तं स्वप्नदेहम् पंचाश्वान् ज्ञानेंद्रियाणि
वि॰ पुण्यपापे चक्रे इत्यादि एवंभूतरथस्थः जीवः मृगतृष्णां धावति चंडवेगं संवत्सरात्मकं कालं तस्यानुचराः ते दिवसाः ३६० तेषां प-
त्न्यः गंधर्व्यः ताः शुक्लकृष्णाः रात्रयः ३६० एते सर्वे आयुर्हरंति कालकन्या जरा मृत्युः क्षयाय तां जगृहे तस्य सेनाः आधयो व्याधयः प्रज्वारः
वैष्णवज्वरः इत्यादि सर्वं ऊह्यम् एवं बहुविधैः दैवभूतात्मसंभवैः दुःखैः जीवः अज्ञानावृत्ते देहे शतं वर्षाणि क्लिश्यमानः ममाहमिति-
कर्मकृत् कामलवान् ध्यायन् शेते यदा आत्मानं भगवंतमिति न ज्ञायते तदा प्रकृतेर्गुणेषु सज्जते ततः क्वचित् पुमान् क्वचित् स्त्री क्वचि
त् नपुंसकं देवो मनुष्यादिरूपो वा भवति तस्मात् कर्म एव कुर्वाणः बुध्या कृतं स्वस्मिन् आरोप्य स्वयं संसृतिं याति अतः अहं कर्तृत्वं त्य
क्त्वा अस्मिन्मनुष्यदेहे ज्ञानवैराग्ययुक्तः सन् हरौ वासुदेवे भक्तिं कुर्वन् क्रमात् मुक्तो भवति हे राजन् इमं मृगं पुष्पवाटिकायां रक्तपृ
ष्ठे लुब्धकं अग्रे असुतृपः वृकान् अविगणय्य स्त्रिया सह रममाणं पश्य एवं मृगचेष्टितं विचार्य अंतर्हृदि ईश्वरं निधेहि किंच हे राजन्
भूतानां मन एव बंधमोक्षयोः कारणम् अतः विश्वं तदात्मकं पश्यन् सर्वात्मना हरिं भज मैत्रेय उवाच भगवान् नारदः प्राचीन
बर्हिषे हंसयोः गतिं प्रदर्श्य तं आमंत्र्य सिद्धलोकं अगमत् राजा प्रजारक्षणे पुत्रान् आदिश्य कपिलाश्रमं गत्वा तत्र भक्त्या गोविंदचर-
णांबुजं भजन् तत्साम्यतां इयात् एतत् यः शृणुयात् श्रावयेत् सः लिंगशरीरेण मुच्यते किंच एतत् देवर्षिवर्यमुखनिःसृतं भगवद्यशो १६

युक्तंयःपठेत् सःमुक्तबंधःसन् अस्मिन् भवेपुनःनभ्रमति ८५ इतिचतुर्थेएकोनत्रिंशः२९ विदुरउवा० हेब्रह्मन् प्राचीनबर्हिषःपुत्राःदशप्रचेतसः
त्वयायेपूर्वंअभिहिताःतेरुद्रगीतेनहरिंप्रतोष्यकांसिद्धिंआपुः मैत्रेयउवाच तेप्रचेतसःउदकेस्थित्वाजपयज्ञेन परमात्मानं अतोषयन्
ततःभगवान्दशवर्षसहस्त्रांतेस्वतेजसातेषांक्लेशंशमयन् भगवान् पीतवासाः अष्टभुजःकिरीटीगरुडकिन्नरगीतकीर्तिःगरुडारूढःसन्
आगत्यतान् उवाच हेनृपनंदनाःवः भद्रं वरं वृणीध्वम् वःबंधूनांसौहृदं दृष्ट्वा अहंतुष्टोस्मि यःसंध्यायांनित्यंयुष्मान्स्मरति तस्यभ्रातृ
षु आत्मसाम्यं भविष्यति येतुमांसायंप्रातःरुद्रगीतेनस्तुवंति तान्प्रतिकामवरान् प्रज्ञांचदास्ये यूयंपितुराज्ञांकृतवंतःअतःवःकीर्तिः
लोकान्प्राप्स्यति वःएकःविश्रुतःपुत्रःभविता यःआत्मसंतानेनत्रिलोकींपूरयिष्यति किंच कंडोःऋषेःसकाशात् प्रम्लोचायांअप्सर
सिलब्धांकन्यांवृक्षाःजगृहुःतांयूयं उद्वहत तयासहदिव्यवर्षसहस्त्राणांसहस्त्राणि भौमान्दिव्यांश्वभोगान् ममानुग्रहात् भोक्ष्यथ
अथमयिभक्तिंकृत्वामांयास्यथ गृहेष्वपिस्थितानांमद्वार्तयागतकालानांपुंसांगृहधर्माःबंधायनभवंति मैत्रेयउवाच एवंभगव
द्वाक्यंश्रुत्वाप्रचेतसःप्रांजलयःतंअगृणन् प्रचेतसऊचुः नमोनमःक्लेशविनाशनायइत्यादि हेजगत्पते त्वत्प्रसादोयःजातःअयमे
व अस्माकंवरःइष्टःहेनाथहेअनंत अन्यंवरं वृणीमहे इहकर्मभिः यावत् भ्रमामतावत् प्रतिजन्मनि भवत्प्रसंगानां संगोस्तु भगवत्संगि
संगस्यलवेनसमंस्वर्गंअपुनर्भवमपिनतुलयाम अहोवयं भवस्यक्षणसंगेनमृत्युरोगघ्नंत्वांवैद्यंप्राप्ताःस्म किंच यद्यत्वयंकरिष्यामःतत्स
र्वंतेसंतोषायअस्तुइतिवृणीमहे श्रीवासुदेवायतुभ्यंनमः इतिस्तुतिंचक्रुः मैत्रेयउवाच हरिःतथास्त्वित्युक्त्वास्वधामययौ ततःतेप्रचे
तसःसलिलाद्बहिःनिर्गत्यद्रुमैःछन्नांमहींवीक्ष्य मुखतःअग्निमारुतौउत्पाद्य वृक्षान्दग्धुंउपचक्रमुः अथतत्रब्रह्माएत्यवृक्षेभ्यःकन्यांगृहीत्वा
क्रोधशांत्यैतेभ्यःददौतेप्रचेतसःब्रह्माज्ञयामारिषांनाम्नींकन्यांउपयेमिरे तस्यांदक्षःब्रह्मपुत्रःशिवावज्ञानात् क्षत्रियवंशेपुनर्जातःतंदक्षंय

थाकाले प्रजासर्गरक्षायां ब्रह्मा अभिषेचयत् ५१ इतिचतुर्थे त्रिंशः ३० मैत्रेयउवाच दिव्यवर्षसहस्राणांसहस्रस्यांतेउत्प
न्नविज्ञानाः तेप्रचेतसः अधोक्षज भाषितंस्मरंतः आत्मजे भार्यांन्यस्य प्रतीच्यांदिशि समुद्रतटे यत्रजाजलिर्नामऋषिः सिद्धः अ-
भूत् तत्रगत्वा ब्रह्मसत्रेण दीक्षिताबभूवुः तान् परब्रह्मणियोजितात्मनः ज्ञात्वानारदः ययौ तेनारदं दृष्ट्वा पूजयित्वा प्रणिपत्य प्र-
चेतसः ऊचुः हे सुरर्षे ते स्वागतमस्तु तवचक्रमणं सर्वेषां अभयाय भवति हे मुने पूर्वं भगवताशिवेन यदुपदिष्टं तत् गृहेषु सक्ता
नां नः प्रायः क्षपितम् अतः तत् अध्यात्मज्ञानं नः प्रद्योतय येन भवाब्धिं तरिष्यामः नारदउवाच हे प्रचेतसः येनहरिः से
व्यते तज्जन्म तानि कर्माणि आयुः मनः तदेव अहो श्रुतेन तपसा योगेन सांख्येन न्यासेन अन्यैः श्रेयोभिश्च किम् यत्र आत्मप्रदः
हरिः न यथा तरोः मूलनिषेचनेन स्कंधा द्यास्तृप्यंति तथा अच्युतेज्या सर्वार्हणं भवति अतः सर्वात्मानं ईश्वरं आत्मैकभावेन अ-
द्धा भजध्वम् दयया सर्वभूतेषु संतुष्ट्या येन केनवा सर्वेंद्रियोपशांत्या च तुष्यत्याशु जनार्दनः १ मैत्रेयउवाच इतितान्
श्रावयित्वा मुनिः ब्रह्मलोकं ययौ तेपि नारदवचः श्रुत्वा हरिपदं ध्यायंतः तद्गतिं ययुः हे विदुर यत्त्वं मां पृष्टवान् तत्ते प्रचेतसां ना
रदस्य संवादरूपं एतत् आख्यानं हरिकीर्तनरूपं तव कथितं श्रीशुकउवाच हे परीक्षित् एवं ते उत्तानपदः वंशः वर्णि
तः इतः प्रैयव्रतं वंशं शृणु इमां मैत्रेयवर्णितां हरिसत्कथां श्रुत्वा भक्त्या हरेः चरणं हृदा मुने श्चरणं मूर्ध्ना दधार विदुरउवाच
हे महायोगिन् करुणात्मना भवता तमसः पारः दर्शितः इत्युक्त्वा विदुरः तं आमंत्र्य स्वानां दिदृक्षुः हास्तिनपुरं ययौ श्रीशुकउवा॰
हे राजन् एतद्यः शृणुयात्सः आयुर्धनं यशः स्वस्तिगतिमैश्वर्यमाप्नुयात् ३१ इतिचतुर्थे एकत्रिंशः ३१ ॐ समाप्तः स्कंधः ॐ

ओ॰३ आत्मविमर्शन, ओ॰५ प्रकाशय,